No. ५३२७

Title सिद्धान्तकौमुदी

Author

Extent ४८ पत्र Age

Subject व्याकरण

सिद्धान्तकौमुदी

॥५३॥

अचायार्थ श्लो० ८०

सि॰कौ
४

श्री॥स्वरादिनिपातमव्ययम्॥स्वरादयोनिपाताश्चाव्ययसंज्ञाःस्युः॥
स्वरितिस्वर्गेपरलोकेच॥अन्तरितिमध्ये॥प्रातरितिप्रत्यूषे॥
पुनरितिवारंवारप्रथमेविशेषेच॥सनुतरित्यन्तर्द्धाने॥स्वराद्याः
पञ्चरेफान्ताः॥उच्चैस्महति॥नीचैस्इत्यल्पे॥शनैस्क्रियामान्द्ये
॥ऋधक्सत्ये र्थे॥वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये॥ऋतेव
र्जने॥युगपदित्येककाले॥आराद्दूरसमीपयोः॥पृथगितिभिन्ने
॥ह्यस्अतीतेऽह्नि॥दिवादिवसे॥रात्राविति निशि॥सायमितिनि
शामुखे॥चिरमितिबहुकाले॥मनाक्॥ईषत्स्मावल्ये॥जोषमस्तु
श्वस्अनागतेऽह्नि॥=२

शिव
४

॥तूष्णीमितिमौने॥ वहिस्त्ववाह्ये॥ अवस्त्ववाह्ये॥ समयेतिसमीपेमध्येच॥ निकषा
इ स्यंतिके॥ स्वयमआत्मनेत्यर्थे॥ वृथेति व्यर्थे॥ नक्तमितिरात्रौ॥ हिताविति नि नञ्निषेधे २
मित्ते॥ इद्धेति प्रकाशे॥ अद्धेतिस्फुटावधारणयोः नत्वातिशये॥ रित्येके॥ सामी
त्यर्द्धजुगुप्सितयोः॥ ब्राह्मणवत् क्षत्रियवत् एतौ च तुल्ये ना नतुल्य भिक्ष विहितो
वतिप्रत्ययः यत्तत्र सगीद्वाव्यर्थेइतिविहितः सनेह त्यसने यदुक्तो निवत्तो याक्षि॥
सनात् ६ सनासनत्एतेनित्ये॥ उपधेति॥ तिरसन्तर्द्धौ तिर्यगर्थे परिभवे च॥ अन्त
रेति मध्ये विनार्थे च॥ अन्तरेणेतिवर्ज्जने॥ ज्योगिति कालस्यप्रस्त्वे॥ प्रसे
शीघ्रार्थे संप्रत्यर्थे च॥ कमितिवारिमूर्द्धनिन्दासुखेषु॥ शं सुखे॥ सहसेत्या
कस्मिकाविमर्षयोः॥ विनेतिवर्ज्जने॥ नानेत्यनेकविनार्थयोः॥ स्वस्तीतिमंगले॥

सिको
२
2

स्वधापितृदाने॥ अलंभूषणपर्याप्तिवारणनिषेधेषु॥ वषट्॥ वौषट्॥ श्रौषट्॥
एते हविर्दाने॥ अंतर्यदित्यप्राप्ते॥ अस्तीति सत्तायाम्॥ उपांश्विस्य प्रकाशेच॥
रहस्यारहस्ययोः रहस्यमेकान्तं॥ तमेति ग्लानौ॥ विहायसेति वियदर्थे॥ दो
षेति रात्रौ॥ मृषा मिथ्या एतौ वितथे विपतत इति मिथ्या मुधेति व्यर्थे॥ पुरे
त्यविरते चिरातीते भविष्यदासन्ने च॥ मिथो॥ मिथस एतौ रहःसहार्थयोः
॥ आयस इति वा हुस्य॥ बहुस इति पुनरर्थे॥ प्रवाहुकमिति समकाले
ऊर्ध्वे च॥ प्रवाह्निकेति पाठांतरं॥ आर्थे॥ हलमिति वलात्कारे॥ शा
कटायनस्तु आर्येति प्रतिवंधे॥ हलमिति प्रतिसेध विवादयोरित्याह॥
॥ आभीक्ष्णमिति पौनःपुन्ये॥ साकं॥ साईम एतौ सहार्थे॥ नमस नतौ॥ हिरुक वर्जने
धिक निन्दाभर्त्सनयोः॥ अथ अमशै घर्थे त्यच॥ आम ओं गीकारे॥ किम

शिव
२

सयस

तिङः अयेतिकाल प्रत्ययादिस्यादिभिश्च विहितः प्रत्ययो हि गृह्य
ते एपाचत्तराम् कारयामास प्रनाम् ग्लानौ प्रप्रान् समाकर्ये ना २
प्रतान् विस्तारे। मामाङ् एतौ निषेधार्थौ माङ्योः आङिति गरोगा
यम् तेनैन्योपि स्तेया। तथाहि कामं स्याच्चन्ध्येष्वा चन्ध्यमेकान्तम्प्र
कामभिस्यतिशये। अं इति पुनरर्थे। साम्प्रतमिति न्याय्ये। परमिति किन्त्वर्थे
साक्षात् प्रत्यक्षे। साचीति तिर्यगर्थः। सममिति सहाङ्गीकारे। मङ्क्षु आश्वर्थे पे
घ्येच सुष्ठु प्रशंसायां। संवत् वर्षे। अवश्यं निश्चये। उषेति रात्रौ। ओमि
त्यङ्गीकारे ब्रह्मणि च भूरिति पृथ्व्यां भुवरन्तरिक्षे अटतिङ गितितर
मा एतेशेषेषु सुष्ठु प्रशंसायाम् दुष्टु निकृष्टे गर्हजायां कु इति कुत्सितेषदर्थयोः

सिकौ
२

र्थं जसेतित त्वशी घ्रार्थयोः मिथुरिति द्राविताथ्यैं। यस्तमित्ति विनाशे। ४
स्यानेरतिथुक्तो वरमित्तिईषदुत्कर्षे सदिमुक्तपद्दे। वदि कुत्सपद्दे
।३स्यादिचादीनुदाहरति। चेतिसमुच्चयान्वाचयेतरेतरयोगसमाह
रेषु। वास्यादिकल्पोपमपोह्ि वार्थे पिसमुच्चये। हेतिप्रसिद्धौ। प्र
हेतिपूजायां। एवेत्यवधारणो। प्रनवमूतोच। एवमित्युक्तपरा
मर्शे। नूनमितिनिश्चयेत्तर्केच। शश्वदितिपौनःपुन्येनित्येसहार्थेच
प। पुगदितिसैककाल्ये। अयस्युनरर्थे, प्राधिक्येच। कूपदितिप्रश्नेप्रशं
सायांच। कुविदितिभूर्यर्थे प्रशंसायांच। नेदितिशंकायांप्रतिषेधविचा
शं
शिव
२

अभिप्रायः असहनं निन्दा अद्भुतं

चेदिति यद्यर्थे॥ वण्॥ यद्यर्थे चेदर्थे णित्॥ समुच्चये पादे त्वननुबंधः॥ कच्चिदिति
इष्टप्रश्ने॥ पत्रेत्यनवक्लृप्त्यामर्षगर्हाश्चर्येषु॥ नावकल्पयामि न मर्ष
यामि गर्हे, आश्चर्यं वा यत्र भवान् वृषलं याजयेत्॥ नहेति प्रत्यारंभे॥ हंतेति
हर्षे विषादे अनुकंपायां वाक्यारंभे च॥ माकिः माकीं नकिरिति त्रयो
पि वर्जने॥ माङ् नञो स्वरादिषु कौ रहपाठस्तु निपातत्वाद्यर्थः ते
नाद्युदात्तत्वं सिध्यतीति प्राञ्चः तच्चिन्त्यं फिट्स्वरेणापि इष्टसिद्धेः प
दप्याहुः सत्ववचनानामपि, अव्ययसंज्ञार्थं स्वरादिपाठ इति॥ त
दपि चिंत्यं लक्ष्मीवाचकस्यापि माशब्दस्याव्ययत्वापत्तेः॥ तस्माद्
मयेत्र पाठे फलं चिन्त्यं॥ यावत्तावदेनौ साकल्यावधिमानावधार
णेषु॥ साकल्ये यावत्कार्यं तावत्कृतं, अवधौ यावद्भुक्तं तावत्तिष्ठ

उरखंषा दया

निपाताद्युदात्ताः

२ पृगा

चेदिषु

फिषोन्तउदात्तः फिट् इति प्रातिपदिकं तस्यान्तउदात्तः स्यात्

लिंगसंख्या कारकाभिर्नतद्व्यं

सि॰कौ
५

पा॰

मानेयावद्दत्तंतावद्भुक्तं ऽत्रव धारतोयावदमंत्रंतावद्ब्राह्मणानामंत्रप
स्व॥ वैविशेषैत्तकयोः दैवितर्के॥ वेइतिपाठांतरं॥ वैदाने ऽप्यनादरे च ऐतौ
॥ रैकरोतिददातीत्यर्थः॥ त्वं रे किं करिष्यसि श्रौषट् वौषट् हविर्दाने
॥ स्वाहा देवताभ्योदाने॥ स्वधेतिपितृभ्यः॥ श्रौषडादीनामनेकाचामुभ
यत्रपाठः स्वरभेदार्थः॥ तुमिति तुंकारे॥ गुरुं तुं हत्स्य ऊं हत्स्य॥ तं
श्याहीतिनिर्देशने॥ खल्विति निषेधे वाक्यालंकारे निश्चये च॥ किले भूष
तिवार्तायामलीके च [illegible] तिमंगलानंतरारंभप्रश्नकार्त्स्न्येष्वधिका संदृ
रप्रतिज्ञासमुच्चयेषु॥ अथ स्वरादिरपि मंगलवाचकस्य सत्वाथ॥ ४
वेदाध्ययनं सिध्यति॥ तथा च श्रीहर्षः अन्यस्य कुंभीं जाम्बवतु [illegible] चा
स्तिविषिवेदिकोदरे यथा कुलाचारमथावनीन्द्र जीं पुरंध्रिवर्गः शिव॰ ४

ग्रंथकार रघुशानकुंभ=२

=३

अथपुरोध्रुवमः शातकुंभजाः कुम्भीः उदस्य वारत्रिवि वेदिकोदरे अवनीन्द्रजां तं
यथाकुलाचारं अथस्नपयां बभूव॥ इत्यन्वयः॥

स्नपयांबभूवतामिति, प्रगृहितं पस्नपयांबभूवेत्यस्यामंत्रः लंस्नपनंच
कारेत्सर्पः निपातस्तुस्वरूपेरोवमंत्रः लंग्न दंगाध्वनिवतत्स्वरभेद
र्थःपाठस्सतीतेपादपस्तररोचः पादहेस्तुपक्रमहिंसाकुस्सनेपु प्रव
दतमितिश्र्हः अनुपसरीत्वात् अचउपसर्गात इतिनभवति, प्रहमितिस
वंतघ्नतिरूपकं एतेनगेये केन विनीतोवामितिव्याख्यातं निस्पर्येहि
वामिसूत्रयं जस्तीतिति उंतप्रतिरूपकं एवमस्मीत्यहमर्थेत्वामस्मि
वचने अहस्तुवाचेसर्पे, प्रासेतिवभूवेत्यर्थेइत्यादिः अइतिसंवोधनेः त्र
धिक्षेपेनिषेधेच, अइतिवाक्यस्मरणे योः उसंवोधनेजुगुप्साविस्मयेपु
ईउऊएऐओऔ संवोधनेपंफस्स्यगर्भेपफमन्यमानाः ङकंशेष
पथाकथ्यांचेस्वनादरेपारप्यादुगाहेहेभोः अपएतेसंवोधनेयेति हिं

कृत्यादि
सिद्धान्त
कैकरेण

सि कौ
५

१२

साप्रातिलोम्येपाद स्तरसोष्ठुविष्णुनानार्थे एकपदे इस्पस्मादिस्य थैपु
त्कुसापूर्वंगप्रातैतिश्तोपीस्यर्थे ॥ ग्राकृतिगणश्तितद्वयथा यतदिति ॥ हेर
तोग्मा होस्वित्वि क स्यसोमस वैतो भावे कपाद स्तरसो ।ठकमति श
पोग्रनुकं वितर्कै यंवट ग्र्प्रतः कर्र्सो ग्राभिम्रुखे चवूपा दस्तुरसो २
वार्थेचदि[illegible] स्यानं देवद्रुचाटु ध्रियेवाक्येउ स्मितिभैर्ही ने इवेतिशा
ह्स्यैप्र पतेव इतीपतीमिस्वर्थे इत्यादिग्रगे दमवधेयं ॥ स्तुरादिचाद्यैारा
कृतिगणस्त्वाविशेषपियेषांनिपातस्वर इष्टसेचादिषु ग्रन्येस्तुरा
दषु ॥

सिव
२

याकृयंते व्युत्पाद्यंते शब्दा अनेनेति वैयाकरणम् =

6

ब =

सि० कौ०
१ हलिति गर्यते =

ओंश्रीगणेशाय नमः ॥ नमः सरस्वत्यै ॥ ॐ मुनित्रयं (१) नमस्कृत्य तदुक्तीः परिभाव्य (२) च । वैयाकरणसिद्धान्तकौमुदी
यं विरच्यते (३) ॥ अइउण् ।१। ऋऌक् ।२। एओङ् ।३। ऐऔच् ।४। हयवरट् ।५। लण् ।६। ञमङणनम् ।७। झभञ् ।
८। घढधष् ।९। जबगडदश् ।१०। खफछठथचटतव् ।११। कपय् ।१२। शषसर् ।१३। हल् ।१४। इति माहेश्वराणि (४)
सूत्राणि अणादिसंज्ञार्थानि (५) एषामन्त्या इतः लण्सूत्रेऽकारश्च (६) हकारादिष्वकार (७) उच्चारणार्थः ॥
हलन्त्यम् १।३।३ हलिति (८) सूत्रेऽन्त्यमित्स्यात् ॥ आदिरन्त्येन सहेता ।१।१।७१ अन्त्येनेता (९) सहित आदिर्म
ध्यगानां स्वस्य च संज्ञा स्यात् । इति हलसंज्ञायाम् । हलन्त्यम् । (१०) उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चा
रणम् । ततोऽण् अजित्यादिसंज्ञासिद्धौ ॥ उपदेशेऽजनुनासिक इत् ।१।३।२ उपदेशेऽनुनासिकोऽजित्संज्ञः स्या
त् । प्रतिज्ञानुनासिक्याः पाणिनीयाः (११) लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा (१२) प्रत्या
हारेष्वितां (१३) न ग्रहणम् अनुनासिक इत्यादिनिर्देशात् (१४) न ह्यत्र ककारे परेऽच्कार्यं (१५) दृश्यते ।
आदिरन्त्येनेत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन (१६) व्यवह्रियन्ते ॥ ऊकालोऽज्झ्रस्वदीर्घप्लुतः
१।२।२७ उश्च ऊश्च ऊ३श्च वः वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् । स च (१८) प्र^
त्येकमुदात्तादिभेदेन त्रिधा ॥ उच्चैरुदात्तः ।१।२।२९ ताल्वादिषु (१९) सभागेषु स्थाने ऊर्द्ध्वभागे निष्पन्नो

धातुसूत्रगणोणादिवाक्यलिंगानुशासनं आगमः प्रत्ययादेश उपदेशः प्रकीर्तिताः २ =
प्रत्ययाद्यवकीर्यंते संक्षिप्यन्ते वर्णा अनेनेति प्रत्याहारः =

अनुनासिक प्रतिज्ञा सामर्थ्यो के चित् नंत्येनापि प्रत्याहार सिद्धिः ॥ =

शिव०
२

का
च्यते
वना
स्येति

परस्परसापेक्षत्वं अन्योन्याश्रयत्वं अन्योन्याश्रयाणि कार्याणि न क्रियंते न प्रकल्प्यंते तस्मैकशेषा
न्यतमेनापि कार्याणि क्रियंते।

सिद्धान्तकौमुदी आरम्भ से हलन्त तक
श्लोक ७०४ प-४२
नं ५२

ऽनुदात्तसंज्ञः स्यात्। आये (२०) नीचैरनुदात्तः १।२।३० स्पष्टम्। अवीङ् (२१) समाहारः स्वरितः १।२।३१ उदात्तानुदात्तत्वविशिष्टौ धर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्। तस्यादित उदात्तमर्द्धहृस्वम् १।२।३२ हृस्वग्रहणमतन्त्रम् (२२) स्वरितस्यादितोऽर्द्धमुदात्तम्बोध्यम् उत्तरार्द्धन्तु परिशेषादनुदात्तम्। तस्य चोदात्तस्वरितपरत्वे (२३) श्रवणं स्पष्टम्। अन्यत्र (२४) तूदात्तश्रुतिः प्रातिशाख्ये (२५) प्रसिद्धा। क वोऽश्वा रथानां नयेऽराः शृत चक्रं यो ह इत्यादिष्वनुदात्तः (२६) अग्निमीळे पुरोहित मित्यादावुदात्तश्रुतिः (२७) स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा। मुखनासिकावचनो (२८) ऽनुनासिकः १।१।८ मुखसहितनासिकयोच्चार्यमाणोऽनुनासिकसंज्ञः स्यात्। तदित्थम् अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। ऌवर्णस्य द्वादश तस्य दीर्घाभावात्। एचामपि द्वादश तेषां हृस्वाभावात्। तुल्यास्यप्रयत्नं (२९) सवर्णम् १।१।९ ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यन्तन्मिथः सवर्णसंज्ञंस्यात्। अकुहविसर्जनीयानां कण्ठः। इचुयशानान्तालु। ऋटुरषाणाम्मूर्द्धा। ऌतुलसानान्दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणन

मुखसहिता नासिका मुखनासिका उच्यतेऽनेनेति वचनं मुखनासिकावचनं। अस्येति विग्रहः।

तुलनं तुला तुलया सम्मितं तुल्यं आस्ये भवमास्यं तुल्यं च आस्यं च तुल्यास्ये तुल्यास्यो प्रयत्नो यस्य तत् तुल्यास्यप्रयत्नमे =

सि. कौ. २

2

नानान्नासिका च (३०)। एदैतोः (३१) कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूली
यस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य। इति स्थानानि। (३२) प्रयत्नो (३३) द्विधा आभ्यन्तरो बाह्यश्च
आद्यश्चतुर्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् (३४) तत्र स्पृष्टम्प्रयतनं (३५) स्पर्शानाम् ईषत्स्पृ
ष्टमन्तःस्थानां विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायान्तु विवृतमे
व (३६)। एतच्च सूत्रकारेण ज्ञापितम्। तथाहि। अ अ (३७) ८।४।६८ विवृतमनूद्य संवृतोऽनेन
विधीयते। अस्य (३८) चाष्टाध्यायीं सम्पूर्णाम्प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव।
पूर्वस्मिन् इति =
तथा च सूत्रम्। पूर्वत्रासिद्धम्। ८।२।१। अधिकारोऽयं (३९)। तेन सपादसप्ताध्यायीम्प्रति त्रि
पाद्यसिद्धा त्रिपाद्यामपि पूर्वम्प्रति परं शास्त्रमसिद्धं स्यात्। बाह्य (४०) प्रयत्नस्त्वेकादशधा
विवारः संवारः (४१) श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरि
तश्चेति। खयां यमाः खयः ᳵक ᳶप विसर्गः शर एव च। एते श्वासानुप्रदाना (४२) अघो
षाश्च विवृण्वते (४३)। कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः। अयुग्मा वर्गयमगा
(४४) यणश्चाल्पासवः (४५) स्मृताः। वर्गेष्वाद्यानां चतुर्णाम्पञ्चमे परे मध्ये यमो नाम पूर्व

शिव २

सदृशो वर्णः प्राप्तिशास्त्रप्रसिद्धः। पलिक्क्नी। चख्ख्नतुः। अग्ग्निः। घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः। तत्र वर्गाणां प्रथमद्वितीयाः खयस्तथा तेषामेव यमाः जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां विवारः श्वासो ऽघोषश्च। अन्येषान्तु संवारो नादो घोषश्च। वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः अन्ये (४६) महाप्राणा इत्यर्थः (४७) बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञाया मनुपयुक्ता स्तथाप्यान्तरतम्य (४८) परीक्षायामुपयोक्ष्यन्त इति बोध्यम्। कादयो मावसानाः (४९) स्पर्शाः। यरलवा अन्तःस्थाः। शषसहा ऊष्माणः। अचः स्वराः + क ᳵ प इति कपाभ्यां (५०) प्रागर्द्धविसर्गसदृशो जिह्वामूलो (५१) पध्मानीयौ। अं अः इत्यचः परावनुस्वारविसर्गौ (५२) इति स्थानप्रयत्नविवेकः। ॥ ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्। ॥ अकारहकारयोरिकारशकारयोः ऋकारषकारयोः लृकारसकारयोश्च सावर्ण्ये प्राप्ते। नाज्झलौ। १।१।१० आकारसहितोऽच् आच् (५३) स च हल् चेत्येतौ मिथः सवर्णौ न स्तः। तेन दधीत्यस्य हरति, शीतलं षष्ठं सान्द्रमित्येतेषु यणादिकं न अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणक (५४) शास्त्रबलादच्त्वं (५५) स्यात्। तथाहि। अणुदित्सवर्णस्य (५६)

सवर्णस्य भावः (above line 11)

लृत्यैकदेशान्वृत्तित्वं व्याप्तित्वं। अलत्वे लक्षणवृत्तित्वं व्याप्तिः। लक्षमात्रावृत्तित्वं असंभवः =

आच ऋलृवर्णयो
ऋलृवर्णतेयोः =

अचश्च आ च अनयोः समाहार आच।
न ऽ झलौ नाज्झलौ =

सि॰ कौ॰
२

३

प्रतीयते विधीयते इति प्रत्ययः। अविधीयमानोऽणुदिच्च (५७) सवर्णस्य संज्ञा स्यात्। अत्राण् परेण (५८)
णकारेण। तदेवम् अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः एवम् लृकारोऽपि। ए
चो द्वादशानां। एदैतोरोदौतोश्च न मिथः सावर्ण्यम्। ऐऔजिति सूत्रारम्भसामर्थ्यात्। तेनैचश्चतुर्विं
शतेः संज्ञाः स्युरिति नावादनीयम्। नाज्झलाविति निषेधो यद्यपि (५९) आक्षरसमाम्नायि
कानामेव तथापि हकारस्याऽऽकारो न सवर्णः तत्राकारस्य प्रश्लिष्टत्वात्। तेन विश्वपाभि
रित्यत्र होढ इति ढत्वन्न (६०) भवति। अनुनासिकाऽननुनासिकभेदेन यवला द्विधा (६१)
तेनाऽनुनासिकाऽननुनासिकास्ते द्वयोर्द्वयोः संज्ञा। तपरस्तत्कालस्य १।१।७० तः परो यस्मा
त्सः तात्परश्चो (६२) च्चार्यमाणः समकालस्यैव संज्ञा स्यात्। तेना दिदु दित्यादयः षण्णां ष
ण्णां संज्ञा। ऋदिति (६३) द्वादशानाम्। वृद्धिरादैच् (६४) १।१।१ आदैच्च वृद्धिसंज्ञः स्या
त्। अदेङ् गुणः (६५) १।१।२ अत् एङ् च गुणसंज्ञः स्यात्। भूवादयो (६६) धातवः १।३।१
क्रियावाचिनो (६७) भ्वादयो धातुसंज्ञाः स्युः। प्राग्रीश्वरान्निपाताः (६८) १।४।५६ इत्य
धिकृत्य। चादयोऽसत्वे १।४।५७ अद्रव्यार्थी (६९) श्चादयो निपातसंज्ञाः स्युः। प्रादयः

च आदिर्येषां ते चादयः न सत्वे [illegible]

अत्र एङ् च अ नयोः समाहारः अदेङ्

आदिशब्दयोर्व्यवस्था प्रकारवाचिनोरेके शब्दः भूशब्दस्य व्यवस्थावाचि आदिशब्दे प्रकारवाचि आदिशब्दे ... भेदपाठः ... धातुसंज्ञाः स्युः ... क्रियावाचिनो भ्वादयः धातुसंज्ञाः स्युः ॥

तः परो यस्मात् ... तात्परः ...

आदैच्च ... समाहारः आदैच् ... भूश्च वाश्च ... आदिश्च ... शब्दयोरितरेतरयोगद्वन्द्वः

प्र आदिर्येषां ते प्रादयः

सि॰ व॰ २

क्रियायायोगः क्रियायोगः तस्मिन् क्रियायोगे =

अद्रव्यार्थाः प्रादयस्तथा। उपसर्गाः क्रियायोगे (७०) १।४।५९ गतिश्च (७१) १।४।६० प्रादयः क्रिया
योगे उपसर्गसंज्ञाः गतिसंज्ञाश्च स्युः। प्र परा (७२) अप सम् अनु अव निस् निर् दुस् दुर् (७३)
वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः। नवेति (७४) विभाषा।
१।१।४४ निषेधविकल्पयोर्विभाषा संज्ञा स्यात्। स्वं रूपं शब्दस्याशब्दसंज्ञा। १।१।६८ शब्दस्य स्वं
रूपं संज्ञि (७५) शब्दशास्त्रे या संज्ञा तां विना। येनविधिस्तदन्तस्य १।१।७२ विशेषणं तदन्तस्य संज्ञा
स्यात्। स्वस्य च रूपस्य (७६) समासप्रत्ययविधौ (७७) प्रतिषेधः। उगिद्वर्णग्रहणवर्जम् (७८)
विरामोऽवसानम् १।४।११० वर्णानां (७९) अभावोऽवसानसंज्ञः स्यात्॥ परः सन्निकर्षः संहिता
१।४।१०९ वर्णानामतिशयितः (८०) सन्निधिः संहितासंज्ञः स्यात्। सुप्तिङन्तं पदम् १।४।१४
सुबन्तं तिङन्तं च (८१) पदसंज्ञः स्यात्। हलोऽनन्तराः संयोगः। १।१।७ अज्भिर् (८२) अव्यवहिता
हलः संयोगसंज्ञाः स्युः। ह्रस्वं लघु १।४।१० संयोगे गुरु १।४।११ संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्।
दीर्घं च १।४।१२॥ इति संज्ञाप्रकरणम्। (८३) इको गुणवृद्धी १।१।३ गुणवृद्धिशब्दाभ्यां

समासश्च प्रत्ययश्च समासप्रत्ययौ तयोर्विधिः समासप्रत्ययविधिः तस्मिन् समासप्रत्ययविधौ =

संयुज्यन्ते वर्णा येन संयोगः =

सुप् च तिङ् च सुप्तिङौ सुप्तिङौ अन्तौ यस्य तत् सुप्तिङन्तं =

सुरुवं ह्रस्व तिङ् तिदीर्घः =

सुखं ह्रस्व तेनाल्पि कुरुते इति ह्रस्वः =

गुणश्च वृद्धिश्च ते गुणवृद्धी =

स्थाने नियोगोऽस्या इति स्थानेयोगा =
आदिश्च अंतश्च आद्यंतौ टश्च कश्च टकौ इतौ ययोः तौ टकितौ =

सि॰ कौ॰
४

विशेषणं च सम्बन्धविशेषणं षष्ठिका षष्ठी = निवर्त्यनिवर्तकभावसम्बन्धः अत्र इकः निवर्त्यः यणो निवर्तकः =

अचश्च १।२।२८ ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच (२) इति षष्ठ्यन्तं पदमुपतिष्ठते। आद्यन्तौ टकितौ १।१।४६ टित्कितौ (३) यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः। मिदचोऽन्त्यात्परः १।१।४७ अच इति निर्द्धारणे षष्ठी। अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो (४) मित्स्यात्। षष्ठी स्थानेयोगा १।१।४९ अनिर्द्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा (५) बोध्या। स्थानञ्च प्रसङ्गः॥ स्थानेऽन्तरतमः १।१।५० प्रसङ्गे सति सदृशतम (६) आदेशः स्यात्। यत्रानेकविध (७) मान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। तस्मिन्निति (८) निर्दिष्टे पूर्वस्य १।१।६६ सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्। तस्मादित्युत्तरस्य (९) १।१।६७ पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयम्। अलोऽन्त्यस्य १।१।५२ षष्ठीनिर्दिष्टस्यान्त्यस्याऽलः (१०) आदेशः स्यात्। ङिच्च (११) १।१।५३ अयमप्यन्त्यस्यैव स्यात्। सर्वस्येत्यस्यापवादः। आदेः परस्य (१२) १।१।५४ परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। अलोऽन्त्यस्येत्यस्यापवादः। अनेकाल्शित्सर्वस्य (१३) १।१।५५ स्पष्टम्। अलोऽन्त्यसूत्रापवादः। अष्टाभ्य औशित्यादौ आदेः परस्येत्यपि परत्वादनेन बाध्यते॥

जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशः स्पृष्टं निर्द्धारणं =

ङ् इत् यस्य असौ ङित् =

एकमलो नेकाल नैति = शित् आदेशः असौ अनेकाल =

निर्विकारो विधिरपवादः =

शित् अनुहोमे ... असौ अनेकाल इत्यपि ... नानुबंध
कतीमे नेकाल त्वं॥ =

शि॰ व॰
४

अधिकः कार्य्यं अधिकारः = बह्वपेक्षकत्वं बहिरङ्गत्वम् अल्पापेक्षकत्वमन्तरङ्गत्वम् ॥=
धातूपसर्गयोः कार्यमन्तरङ्गमन्यत्तु बहिरङ्गम्

स्वरितेनाधिकारः (२४) १।३।११ स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम्। परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः (२५) असिद्धं (२६) बहिरङ्गमन्तरङ्गे। अकृतव्यूहाः (२७) पाणिनीयाः। निमित्तविनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः॥ इति परिभाषाप्रकरणम्॥ इको यणचि ६।१।७७ इकः स्थाने यण् स्यादचि संहितायां (१) विषये। सुधी उपास्य इति स्थिते। स्थानत (२) आन्तर्यादीकारस्य यकारः। सुध्य् उपास्य इति स्थिते। अनचि च। ८।४।४७ अचः परस्य (३) यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वम्। स्थानिवदादेशोऽनल्विधौ।१।१।५६ आदेशः (४) स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ (५)। अनेनेह यकारस्य स्थानिवद्भावेनाऽच्त्वमाश्रित्याऽनचि चेति द्वित्वनिषेधो न शङ्क्यः। अनल्विधाविति तन्निषेधात्। अचः परस्मिन् पूर्वविधौ।१।१।५७। अल्विध्यर्थमिदम्। परनिमित्तोऽजादेशः (६) स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये। इति यणः स्थानिवद्भावे (७) प्राप्ते॥ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु (८) १।१।५८ पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत्। इति स्थानिवद्भावनिषेधः॥ झलां जश् झशि।८।४।५३। इति धकारस्य दकारः॥ अदर्शनं लोपः १।१।६०। प्रसक्तस्यादर्शनं (९)

निमित्तभित्ति। तत्प्रयुक्तं जातमधिकार्य्यं न कुर्वन्ति नोच्चारयन्ति इत्यर्थः=

न त्वचि अनचि तस्मिन् =

पदान्तस्य द्विर्वचने च वरे यलोपस्य स्वरस्य सवर्णस्य अनुस्वारस्य दीर्घस्य जश्त्वस्य चर्त्वस्य तेषां विधिः दीर्घजश्चरां विधयः तेषु दीर्घजश्चर्विधिषु =१०

न कृतो व्यूहः ऊहः लोके निमित्तविनाशः उपकार्ये स्थिति रूपकार्ये तैः अकृतव्यूहाः अकृतकार्याः इति फलितार्थः॥

एकवर्णमाश्रित्य विधिः अल्विधिः अनेकवर्णमाश्रित्य विधिरनल्विधिः

चरमावयवे =

न दर्शनं सुश्रवणम् अदर्शनं अभावः इत्यर्थः॥

संयोगस्यअंतसंयोगांतःतस्य
संयोगान्तस्य =

लोपसंज्ञं स्यात्॥ संयोगान्तस्य लोपः।८।२।२३। संयोगान्तं (१०) यत्पदं तदन्तस्य लोपः स्यात्। इति यह्लोपे प्रा
प्ते। यणः प्रतिषेधो वाच्यः (११)। यणो मयो द्वे वाच्ये। मय इति पञ्चमी यण इति षष्ठीति पक्षे (१२) य
कारस्यापि द्वित्वं तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि (१३) रूपाणि। एकधमेकयं द्विधं
द्वियं द्वियमेकधं द्विधमेकयम्। सुद्ध्युपास्यः। मध्वरिः। धात्रंशः (१४)। लाकृतिः॥ नादिन्याक्रो
शे पुत्रस्य।८।४।४८। पुत्रशब्दस्य न द्वे स्त आदिनीशब्दे परे आक्रोशे गम्यमाने। पुत्रादिनी त्व
मसि पापे। आक्रोशे किं तत्कथने द्विर्वचनं भवत्येव। तत्परे च (१५) पुत्रपुत्रादिनी त्वमसि पा
पे। वा हतजग्धयोः (१६)। पुत्त्रहती। पुत्रहती। पुत्त्रजग्धी। पुत्रजग्धी॥ त्रिप्रभृतिषु (१७) शा
कटायनस्य।८।४।५०। त्र्यादिषु वर्णेषु संयुक्तेषु वा न द्वित्वम्। इन्न्द्रः। इन्द्रः। राष्ट्रम्। रा
ष्ट्रम्। सर्वत्र शाकल्यस्य।८।४।५१ द्वित्वन्न। अर्कः। ब्रह्मा॥ दीर्घादाचार्याणाम्।८।४।५२।
द्वित्वन्न। दात्रम्। पात्रम्॥ अचो रहाभ्यां द्वे।८।४।४८। अचः पराभ्यां (१८) रेफहकाराभ्यां प
रस्य यरो द्वे वा स्तः। हर्य्यनुभवः। न ह्य्य्स्ति॥ हलो यमां यमि लोपः।८।४।६४। हलः प
रस्य यमो लोपः स्याद्वा यमि (१९) इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपन्तुल्यं लो

Margin (left): सि॰कौ॰ ५

Margin (left, beside line 11): अचः स्वरत्रुरहौता
भ्यां रहाभ्यां =

Margin (right, bottom): शिव॰ ५

डयेत।
ऋद्धि। क्रौयत इति सिद्धम्॥१

पारम्भकलत्तु आदित्यो देवताऽस्येति आदित्यं हविः। यमो यमीति यथासंख्यविज्ञानान्नेह। माहात्म्य
म्॥ एचोऽयवायावः।६।१।७८ एकैचः क्रमादय् अव् आय् आव् एते स्युरचि॥ तस्य लोपः।१।३।९
तस्य इतो(२०) लोपः स्यात्। इति यवयोर्लोपो न उच्चारणसामर्थ्यात्। एवञ्चैतत्संज्ञापीह न भवति।
हरये। विष्णवे। नायकः। पावकः॥ वान्तो यि प्रत्यये।६।१।७९ यकारादौ(२१) प्रत्यये परे ओ
दौतो रव् आव् एतौ स्तः। गोर्विकारो गव्यम्। गोपयसोर्यत्। नावा तार्य्यं नाव्यम्। नौवयोध
र्म्मेत्यादिना यत्॥ गोर्यूतौ छन्दस्युपसंख्यानम्॥ अध्वपरिमाणे च॥ गव्यूतिः। ऊतियू
तीत्यादिना यूतिशब्दो निपातितः। वान्त इत्यत्र(२२) वं रान्त गोर्यूतावित्यत्र छकारादपू
र्वभागे लोपो व्योरिति लोपेन वकारः प्रश्लिष्यन्ते। तेन श्रूयमाण वकारान्त आदेशः स्या
त्। वकारो न लुप्यत इति यावत्॥ धातोस्तन्निमित्तस्यैव।६।१।८० यादौ प्रत्यये परे धातोरेच
श्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव(२३) नान्यस्य। लव्यम्। अवश्यलाव्यं(२४) तन्निमि
त्तस्यैवेति(२५) किम्। ओयते(२६)। औयत। क्षय्यजय्यौ शक्यार्थे(२७)।६।१।८१

क्षिदये। अचो यत् क्षिय सार्वधातुकार्धधातुकयोः गुणः क्षेय अतोम् क्षेयम्
अत्र शक्यार्थे यान्तादेशः निपातनात् क्ष। य् य म्। क्षय्यम्। एवं जिजये जय्यम्॥

सि.कौ. ६

यान्तादेशनिपातनार्थमिदम्। क्षेतुं शक्यं क्षय्यम्। जेतुं शक्यम् जय्यम्। शक्यार्थे किम्। क्षेतुं जेतुं यो
ग्यं क्षेयं पापं जेयं मनः॥ क्रय्यस्तदर्थे (२८) ६।१।८२ तस्मै प्रकृत्यर्थाय इदं तदर्थं क्रेतारः क्रीणीयु
रिति बुद्ध्या आपणे प्रसारितं क्रय्यम्। क्रेयमन्यत्। क्रयणार्हमित्यर्थः। लोपः शाकल्यस्य ८।३।१९
अवर्णपूर्वयोः (२९) पदान्तयोर्यवयोर्वा लोपोऽशि परे। पूर्वत्रासिद्धमिति लोपशास्त्रस्यासिद्धत्वान्न

6

स्वरसन्धिः। हर एहि। हरयेहि। विष्ण इह। विष्णविह। श्रिया उद्यतः। श्रियायुद्यतः। गु
रा उत्कः। गुरावुत्कः। कानि सन्ति कौ स्त इत्यत्राल्लोपस्य स्थानिवत्वेन यण्वादेशौ प्रा
प्तौ न पदान्तेति सूत्रेण पदान्तविधौ तन्निषेधान्न भवतः॥ एकः पूर्वपरयोः। ६।१।८४ इत्यधिकृत्य॥
आद्गुणः। ६।१।८७ अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। संहितायाम्। उपेन्द्रः।
रमेशः। गङ्गोदकम्॥ उरण् (३०) रपरः। १।१।५१ ऋ इति त्रिंशतः संज्ञेत्युक्तं तत्स्थाने यो
ऽण् स रपरः सन्नेव प्रवर्तते। तत्रान्तरतम्यात् (३१) कृष्णर्द्धिरित्यत्र अर्। तवल्कार इ
त्यत्र अल्। अचो रहाभ्यामिति पक्षे द्वित्वम्। (३२)॥ झरो झरि सवर्णे। ८।४।६५॥

पूर्वश्च परश्च पूर्वपरौ तयोः =

रपरो यस्मात् असौ रपरः =

श्रीव. ६

वह धातुः कर्मणि क्त । वहतः । वचिस्वपियजादीनां इत्यनेन संप्रसारणं । उ अ हत । संप्रसारणाच्चेति पूर्वरूप । उहत । होढ इति ढत्वं । उढत । झषस्तथोर्धोऽधः इति तकारस्य धत्वं । उढध । ष्टुना ष्टुरिति धकारस्यापि ढत्वं । ढो ढे लोपः । ढलोपे पूर्वस्येति

हलः परस्य (३३) झरो लोपो वा स्यात्सवर्णे झरि । क्ङित्त्वाभावे लोपे सत्येकधम् । असति (३४) लोपे क्ङित्त्वलो पयोर्वा क्ङिधम् । सति क्ङित्त्वे लोपे चासति त्रिधम् (३५) । कृष्णर्द्धिः । कृष्णर्द्धिः । कृष्णर्द्धिः । यण इति पञ्चमी मय इति षष्ठीति पक्षे ककारस्य क्ङित्त्वं लस्य तु अनचि चेति तेन तवल्कार इत्यत्र रूपचतुष्टय म् ॥ क्ङित्त्वे लस्यैव कस्यैव नोभयो रुभयोरपि । तवल्कारादिषु बुधैर्ध्येयं रूपचतुष्टयम् ॥ वृद्धिरेचि ६।१।८८ आदेचि (३६) परे वृद्धिरेकादेशः स्याद्गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्य्यम् । कृष्णौत्कण्ठ्यम् ॥ एत्येधत्यूठ्सु । ६।१।८९ अवर्णादेजाद्योः (३७) एत्येधत्योरूठि च परे वृद्धि रेकादेशः स्यात् । पररूपगुणापवादः । उपैति । उपैधते । प्रष्ठौहः । एजाद्योः किम् । उपेतः । मा भ वान् प्रेदिधत् । पुरस्तात् (३८) दपवादन्यायेनेयं वृद्धिः एङि पररूपस्यैव बाधिका नत्वो माङोश्चेत्यस्य । तेनावेहीति वृद्धिरसाधुरेव ॥ अक्षादूहिन्यामुपसंख्यानम् ॥ अक्षौहिणी (३९) सेना ॥ स्वादीरेरिणोः ॥ स्वैरम् । स्वैरे रितुं (४०) शीलमस्यास्ति स्वैरी । स्वैरिणी ॥ प्रादूहोढो ढ्येषैष्येषु । (४१) प्रौहः । प्रौढः । अपि बहुदृणे नानर्थकस्य (४२) ग्रहणं प्रवत्सति

उकार दीर्घः । ऊढ प्रपूर्वक वृद्धिः प्रौढः इति सिद्धम् ॥

कृष्णस्य एकत्वं = गङ्गाया ओघः =

उत्कण्ठाया भावः औत्कण्ठ्यम् कृष्णस्य औत्कण्ठ्यम्

इण् गतौ लट् इल इति । कर्तरि शप् । इति अदादिभ्यः शपः । इत्यनेन लुक् इति । सार्वधातुकार्धधातुकयोः ...

इण् गतौ । अव पूर्वक आङ्पूर्वक अव आङ् लोट् । सिप् । अव आ इ हि । ...

पूर्वपठितानेऽपवादान्तेऽनंतरान् विधीन् बाधन्ते नोत्तरान् ॥ २४

इण् गतौ । तस् । शप् । अदादिभ्यः ... इति सिद्धं ॥

सि०कौ०

सुत्रे राज्ञेः वधक भ्राजिग्रहणं तेन ऊढग्रहणे क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेशः। प्रौढवा
न्। प्रौढिः। इषु इच्छायां तुदादिः। इष गतौ दिवादिः। इष आभीक्ष्ण्ये क्र्यादिः। एषां घञि
ण्यति च एषः एष्यः इति रूपे तत्र पररूपे प्राप्ते (४३) ऽनेन वृद्धिः। प्रैषः। प्रैष्यः। यस्तु ईष उ
ञ्छे। यश्च ईष गति हिंसादर्शनेषु तयोर्दीर्घोपधत्वात्। ईषः। ईष्यः। तत्रापि गुणे प्रेषः।
प्रेष्यः॥ ऋते च तृतीयासमासे॥ सुखेन ऋतः सुखार्तः। तृतीयेति किम्। परमर्तः। प्रव
त्सतरकम्बलवसनार्णदशानामृणे॥ प्रार्णं वत्सतरार्णमित्यादि। ऋणस्यापनयनाय
यदन्यदृणं क्रियते तदृणार्णम्। दशार्णो देशः। नदी च दशार्णा। ऋणशब्दो दुर्गभू
मौ जले च॥ उपसर्गादृति (४४) धातौ। ६।१।९१ अवर्णान्तादुपसर्गादृकारादौ (४५) धा
तौ परे वृद्धिरेकादेशः स्यात्। उपार्च्छति॥ अन्तादिवच्च ६।१।८५ योऽय (४६) मेकादेशः
स पूर्वस्यान्तवत् परस्यादिवत् स्यादिति रेफस्य पदान्तत्वे॥ खरवसानयोर्विसर्जनीयः ८।३।१५
खरि अवसाने च रेफस्य विसर्जनीयः स्यात् पदान्ते। इति विसर्गे प्राप्ते। अन्तवद्भावेन पदा

शिव

प्रल्कारीयतीति । वर्णितकार । ल्कार । प्रल्कारीयति । ... प्रत्यय । ल्कारीय ... ल्कारीय ... इति सिद्धम् ॥

उपोषतीति । उप दाहे । उ ... लट् तिप् शप् । उपेषतीति । ... उपोषति इति सिद्धम् ॥

प्रेजते इति । एजृ कंपने । एजृ । लट् आत्मनेपदि धातुत्वात् ... इति सिद्धम् ॥ = ८

तेस्य (४७) न विसर्गः उभयथा तु कर्तरि चर्षिदेवतयो रित्यादि निर्देशात । उपसर्गेणैव धातो रात्तेपे भि
न्ने धातावितियोगविभागेन पुनर्वृद्धि विधानार्थम् । तेन ऋत्यक इति प्राप्तिकोपि प्रकृतिभावोऽत्र
न भवति ॥ वा सुप्यापिशलेः ६।१।९२ अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ (४८) वृद्धिर्वा स्यात् । आ
पिशलिग्रहणं पूजार्थम् । प्रर्षभीयति । प्रार्षभीयति । सावर्ण्याल्लृवर्णस्य ग्रहणं प्रल्कारीयति
। प्राल्कारीयति । तपरत्वाद्दीर्घे न । उप ॠकारीयति । उपर्कारीयति ॥ एङि पररूपम् ६।१।९४
आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात् । प्रेजते । उपोषति । इह वा सुपीत्यनुवर्त्य
(उपेडकशब्द) (ओघशब्द)
वाक्यभेदेन व्याख्येयं तेन एङादौ सुब्धातौ वा । उपेडकीयति । उपैडकीयति । प्रोघीयति । प्रौ
(अनिश्चये)
घीयति ॥ एवे (४९) चानियोगे ॥ नियोगोऽवधारणम् । क्वेव भोक्ष्यसे । अनवकॢप्तावेवशब्दः ।
अनियोगे किम् । तवैव ॥ अचोऽन्त्यादि टि १।१।६४ अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टि
संज्ञं स्यात् ॥ शकन्ध्वादिषु (५०) पररूपं वाच्यम् ॥ तच्च टेः । शकन्धुः । कर्कन्धुः । कुटला ।
कुलटा । सीमन्तः केशवेशे । सीमान्तोऽन्यः । मनीषा । लाङ्गलीषा । पतञ्जलिः । सारङ्गः ॥

उपसर्गादृति धातौ इति सूत्रेण ... इत्यनेन ... प्रयोगः ... उपार्कारीयति ... इति प्रयोगः ॥ = ५

उकृञ् करणे । ... धातुत्वात् ... इति सिद्धम् ॥ ५

अंतयोः आदिरन्त्यः ... इत्यादि = ३

शकानां देशानामन्धुः कूपः शकन्धुः = २

कर्कीणां राज्ञामन्धुः कर्कन्धुः = ३

शकन्धु आदिर्येषां ते शकन्ध्वादयः तेषु = ३

बिम्बइव ओष्ठौ यस्य स बिम्बोष्ठः =

ओतुश्च ओष्ठश्च ओतो ... तयोः ओत्वोष्ठयोः =२

स्थूलश्चासौ ओतुश्च स्थूलोतुः =

पक्षिणोः। सारङ्गोन्यः। आकृतिगणोयम्। मार्त्तण्डः॥ ओत्वोष्ठयोः (५१) समासेवा॥ स्थूलोतुः
। स्थूलौतुः। बिम्बोष्ठः। बिम्बौष्ठः। समासे किम्। तवौष्ठः। ओमाङोश्च। ६।१।९५। ओमि आ
ङि च परे पररूपमेकादेशः स्यात्। शिवायोन्नमः। शिव एहि। शिवेहि॥ अव्यक्तानुकरणस्या
त इतौ। ६।१।९८ ध्वने(५२)रनुकरणस्य योऽत्शब्दस्तस्मादितौ परे पररूपमेकादेशः स्या
त्। पटत् इति। पटिति॥ एकाचो न॥ श्रदिति॥ नाम्रेडितस्यान्त्यस्य तु वा। ६।१।९९। आम्रे
डितस्य प्रागुक्तन्न स्यात्। अन्त्यस्य तु तकारमात्रस्य वा स्यात्। डाचि बहुलं द्वे भवतः।
इति बहुलवचनाद् द्वित्वम्॥ तस्य परमाम्रेडितम्। ८।१।२ द्विरुक्तस्य परं रूपमाम्रेडित
संज्ञं स्यात्। पटत्पटेति॥ झलाञ्जशोऽन्ते। ८।२।३९ पदान्ते झलाञ्जशः स्युः। पट त्पटद्
ति॥ अकः सवर्णे दीर्घः ६।१।१०१। अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः।
श्रीशः। विष्णूदयः। अचि(५३) किम्। कुमारी शेते। नाज्झलाविति सावर्ण्यनिषे
धस्तु न दीर्घशकारयोः। अहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यामागनिष्पत्तेः।

सि. कौ.
८

एकाचः विग्रहेय ... एकाचः =५

ओमश्चाङ्च ओमाङौ तयोः ओमाङोः =

अव्यक्तस्य अनुकरणं अव्यक्तानुकरणं तस्य =३

अव्यक्तानुकरणस्य ... अनितौ डाच् इत्यनेन डाच् =

शिव.
८

अकः किम्। हरये। अकोऽकि दीर्घ इत्येव सुवचम्॥ ऋति सवर्णे ऋ वा॥ होतॄकारः। होतृकारः।
॥ लृति सवर्णे (५४) ऌ वा॥ होतॢकारः। पक्षे ऋकारः सावर्ण्यात्। होतृकारः। ऋति ऋ
वा लृति ऌ वेत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम्। आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा अभि
तोऽज्भक्तेर्वरा। द्वितीयस्य तु मध्ये द्वौ लकारौ। शेषं प्राग्वत्। इहोभयत्रापि ऋत्यक इति पाक्षिकः
प्रकृतिभावो वक्ष्यते॥ एङः पदान्तादति (५५) ६।१।१०९ पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्।
हरेऽव। विष्णोऽव॥ सर्वत्र विभाषा गोः। ६।१।१२२ लोके वेदे (५६) चैङन्तस्य गोरति वा प्रकृतिभा
वः स्यात् पदान्ते। गोअग्रम्। गोऽग्रम्। एङन्तस्य किम्। चित्रग्वग्रम्। पदान्ते किम्। गोः॥ अवङ्
स्फोटायनस्य (५७) ६।१।१२३॥ अतीति निवृत्तम्। अचि परे (५८) पदान्ते गोरवङ् वा स्यात्। गवाग्रम्
। पदान्ते किम्। गवि। व्यवस्थितविभाषया (५९) गवाक्षः॥ इन्द्रे च। ६।१।१२४ गोरवङ् स्यादिन्द्रे।
गवेन्द्रः। अथ प्रकृतिभावः॥ प्लुतप्रगृह्या अचि नित्यम् (६०) ६।१।१२५ प्लुताः प्रगृह्याश्च वक्ष्य
न्ते तेऽचि नित्यं प्रकृत्या स्युः। एहि कृष्ण ३ अत्र गौश्चरति (६१) हरी एतौ। नित्यमिति किम्।
हरी एतावित्यादावयमेव प्रकृतिभावो यथा स्यात् इकोऽसवर्णे इति ह्रस्वसमुच्चितो मा भूत्।

एहि इति। आङ्पूर्वक इण् गतौ लोट् सिप्। प्लुतश्च प्रगृह्याश्चेते। =३
हेः से ह्यपिच्च। अनुङ्गः। एहि इति सिद्धं॥ =२

वकुव ह्रि भावप्रो। आत्मने
पदि। लृट्। लस्याने
ते। वकुत स्थितआत्मने
पदानाटेरे। इत्यनेन एत्वं
। वकुते। स्यतासी लृलु
टोः। वकुस्यते। चोः कुः।
वक्ष्यते। धात्वादेः षः सः
। वक्ष्यते। कषसंयो
गे क्ष अक्षरेण। वक्ष्यते।

विवक्षावस्था व्यवस्था
व्यवस्था संजाता अस्येति
व्यवस्थिता व्यवस्थितो
चासौ विभाषा इति
व्यवस्थितविभाषा
तया =

चक्रमस्यास्तीति चक्रि । चक्रशब्दात् इनप्रत्ययः चक्र इन् च क्रिन् ...प्रत्यय ...लोप ... की इति सिद्धं ॥

पार्श्वमिति । पर्शूनां समूहः पार्श्वम् ॥ सि॰कौ॰ ९

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च । ६।१।१२७ पदान्ता (६२) इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्व
श्च वा । अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भा
ष्ये स्थितम् । चक्रि अत्र । चक्र्यत्र । पदान्ता इति किं गौर्यौ । न समासे ॥ वाप्यश्वः ।
(वा॰) सिति च ॥ (वा॰) पार्श्वम् (६३) । ऋत्यकः (६४) ६।१।१२८ ऋति परेऽकः प्राग्वत् । ब्रह्म ऋषिः
। ब्रह्मर्षिः । पदान्ताः इत्येव आर्छत् । समासेऽप्ययं प्रकृतिभावः । सप्त ऋषीणाम् । सप्तर्षीणाम् ।
वाक्यस्य (६५) टेः प्लुत उदात्तः ८।२।८२ इत्यधिकृत्य ॥ प्रत्यभिवादेऽशूद्रे (६६) ८।२।८३ अशू
द्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् । अभिवादये (६७) देवदत्तोऽहम् ॥ भो आ
युष्मानेधि देवदत्त३ । (वा॰) स्त्रियां न (वा॰) । अभिवादये गार्ग्यहं ॥ भो आयुष्मती भव गार्गि ।
नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते ॥ नेह ॥ आयुष्मानेधि भोः ॥
वे॰ (वा॰) भोराजन्यविशां वेति वाच्यम् (६८) (वा॰) आयुष्मानेधि भोः । आयुष्मानेधीन्द्रवर्म्म३न् ।
आयुष्मानेधीन्द्रपालित३ ॥ दूराद्धूते (६९) च ८।२।८४ । दूरात्सम्बोधने यद्वाक्यं तस्य टेः
प्लुतः स्यात् । सक्तून् पिब देवदत्त३ ॥ हैहेप्रयोगे हैहयोः ८।२।८५ । एतयोः प्रयोगे दूरा

सप्तानां ऋषीणाम् ... सप्त ऋषयः ... तेषां सप्तऋषीणाम् ... अशूद्रविषये ...

हैश्च हेश्च हैहे हयौ तयोः हैहयोः ...

शिव॰ ९

हूते यद्वाक्यन्तत्र हैहयोरेव प्लुतः स्यात्। है३राम। राम है३॥ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्।
८।२।८६ दूराद्धूते यद्वाक्यन्तस्य ऋवर्जितस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। दे३वदत्त। देवद३त्त।
देवदत्त३। गुरोः किम्। वकारात्परस्याकारस्य माभूत्। अनृतः किम्। कृष्ण३। एकैकग्रहणं पर्या
यार्थम्। इह प्राचामिति योगो विभज्यते। तेन सर्वः प्लुतो विकल्प्यते॥ अप्लुतवदुपस्थिते। ६।१।१२९
उपस्थितोऽनार्ष इतिशब्दस्तस्मिन्परे प्लुतोऽप्लुतवद्भवति। अप्लुतकार्यं यणादिकं करोति।
सुश्लोक३इति। सुश्लोकेति। वत् किम्। अप्लुत इत्युक्ते प्लुत एव निषिध्येत तथा च प्रगृह्या (२२)
श्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्। अग्नी३ इति॥ ई३ चाक्रवर्मणस्य। ६।१।१३० ई३ः
प्लुतोऽचि परेऽप्लुतवद्वा स्यात्। चिनुहीति (७०) चिनुहि३ इति। चिनुहि३ इदं। चिनुहीदम्।
उभयत्र (७१) विभाषेयम्॥ ईदूदेद्द्विवचनं प्रगृह्यम्। १।१।११ ईदूदेदन्तं द्विवचनं प्रगृ
ह्यसंज्ञं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू। पचेते (७२) इमौ। मणी (७३) वोष्ट्रस्येति तु
इवार्थे वशब्दो वाशब्दो वा बोध्यः॥ अदसो मात्। १।१।१२ अस्मात्परावीदूतौ प्रगृह्यौ स्तः।

सि॰कौ॰ १

10

अमी ईशाः । रामकृष्णावमू आसाते । मात्किम् । अमुकेऽत्र । असति माद्ग्रहणे एकारोऽप्य
नुवर्त्तेत । शे १।१।१३ अयं प्रगृह्यः स्यात् । अस्मे (७४) इन्द्राबृहस्पती ॥ निपात (७५)
एकाजनाङ् ।१।१।१४ एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात् । अ अवयम् । इ विस्मये
। इ इन्द्रः । उ उमेशः । अनाङित्युक्ते रङिताकारः प्रगृह्य एव । आ एवं नु मन्यसे । आ
एवं किल (७६) तत् । ङित्तु न प्रगृह्यः । ईषदुष्णम् । ओष्णम् । वाक्यस्मरणयोरङित् । (७७) =
अन्यत्र ङिदिति विवेकः ॥ ओत् १।१।१५ । ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ।
सम्बुद्धौ (७८) शाकल्यस्येतावनार्षे १।१।१६ सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवै
दिके (७९) इतौ परे । विष्णो इति । विष्ण इति । विष्णविति । अनार्ष इति किम् । ब्रह्मब
न्धवित्यब्रवीत् ॥ उञः १।१।१७ । उञ इतौ वा प्रागुक्तम् । उ इति । विति ॥ ऊँ १।१।१८ उ
ञ इतौ दीर्घोऽनुनासिकः प्रगृह्य ऊँ इत्ययमादेशो वा स्यात् । ऊँ इति ॥ मय उञो
वो वा ८।३।३३ मयः परस्य उञो वो वा स्यादचि । किमु उक्तम् । किम्वुक्तम् । वस्या

शिवं । १

सिद्धत्वान्नानुस्वारः (८०) ॥ ईदूतौ च सप्तम्यर्थे १।१।१९ सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्या
त्। सोमो गौरी (८१) अधिश्रितः। मामकी तनू इति। सुपां सुलुगिति सप्तम्या लुक्। अर्थग्रह
णं किम्। वृत्तावर्थान्तरोपसंक्रान्ते माभूत्। वाप्यामश्वो वाप्यश्वः॥ अणोऽप्रगृह्यस्याऽनुना
सिकः। ८।४।५७। अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात्। दधिँ दधि। अप्रगृह्यस्य
किम्। अग्नी॥ इत्यच् सन्धिः॥ छ। (८२)॥ छ॥ स्तोः (१) श्चुना श्चुः। ८।४।४०। सकार त
वर्गयोः शकार चवर्गाभ्यां योगे शकार चवर्गौ स्तः। हरिश्शेते। रामश्चिनोति। सच्चित्।
शार्ङ्गिञ्जय॥ शात्। ८।४।४४ शात्परस्य (२) तवर्गस्य चुत्वन्न स्यात्। विश्नः। प्रश्नः।
ष्टुना ष्टुः। ८।४।४१ स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा।
तट्टीका। चक्रिण्ढौकसे॥ न पदान्ताट्टोरनाम्। ८।४।४२ अनामिति लुप्तषष्ठीकं पदम्।
पदान्ताट्टवर्गात्परस्याऽनामः स्तोः ष्टुर्न स्यात्। षट् सन्तः। षट् ते। पदान्तात्किम्। ईट्टे।
टोः किम्। सर्पिष्टमम्। (३)। छ। अनाम्नवति नगरीणामिति वाच्यम्॥ छ। षण्णां।

न्ता=२

सि॰ कौ॰ २२ ॥

षण्णवतिः । षण्णगर्यः ॥ तोः षि ।८।४।४३ तवर्गस्य षकारे परे न ष्टुत्वम् । सन्षष्ठः ॥ झलाञ्ज
शोऽन्ते ॥ वागीशः । चिद्रूपम् ॥ यरोऽनुनासिकेऽनुनासिको वा ।८।४।४५। यरः पदान्त (४) स्या
नुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः । एतद् मुरारिः । स्थानप्रयत्नाभ्यामन्तरतमे
स्पर्शे चरितार्थो (५) विधिरयं रेफे न प्रवर्तते । चतुर्मुखः । (छ) प्रत्यये भाषायां नित्यम् । (छ)
तन्मयं मे । चिन्मयम् । (६) कथं तर्हि मदोदग्राः ककुद्मन्त इति यवादिगणे दकारनिपातना
त् । (७) तोर्लि ८।४।६० तवर्गस्य लकारे परे परसवर्णः स्यात् । तल्लयः । विद्वाँल्लिख
ति । नकारस्याऽनुनासिको लकारः ॥ उदः स्थास्तम्भोः पूर्वस्य ।८।४।६१। उदः परयोः (८)
स्थास्तम्भोः पूर्वसवर्णः स्यात् । औदः परस्य ॥ उत्थानम् । उत्तम्भनम् । अत्राऽघोषस्य
(९) महाप्राणस्य सस्य तादृश एव थकारः । तस्य झरो झरीति वाल्किको लोपः । लो
पाभावपक्षे तु थकारस्यैव श्रवणं न तु खरि चेति चर्त्वं चर्त्वं प्रति थकारस्याऽसिद्ध
त्वात् (१०) । उत्थानम् । उत्तम्भनम् ॥ झयो होऽन्यतरस्याम् ॥ ८।४।६२॥

श्रीव॰ २२

झयः परस्य (११) हस्य पूर्वसवर्णो वा स्यात्। घोषवतो (१२) नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः। वाग्घरिः। वाग्हरिः॥ शश्छोऽटि॥८।४।६३ झयः परस्य शस्य छो वा स्यादटि। दस्य चुत्वेन जकारे कृते। खरि च ८।४।५५। खरि झलां चरः स्युः। इति जकारस्य चकारः। तच्छिवः। तच्शिवः। छत्वममीति वाच्यम्। तच्छ्लोकेन। तच्श्लोकेन। अमि

छ्= किम्। वाक्श्च्योतति॥ मोऽनुस्वारः।८।३।२३। मान्तस्य पदस्यानुस्वारः (१३) स्याद्धलि। अलोन्त्यस्य। हरिं वन्दे। पदस्येति किम्। गम्यते॥ नश्चापदान्तस्य झलि।८।३।२४। नस्य मस्य चापदान्तस्य (१४) झल्यनुस्वारः। यशांसि। आक्रंस्यते। झलि किं मन्यसे॥ अनुस्वारस्य ययि परसवर्णः।८।४।५८। स्पष्टम्। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गुम्फितः। कुर्वन्तीत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे तस्यासिद्धत्वान्न णत्वम्॥ वा पदान्तस्य।८।४।५९। पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वङ्करोषि। त्वंकरोषि। सँय्यन्ता। संयन्ता। सँव्वत्सरः। संवत्सरः। यल्ँलोकम्। यंलोकम्। अत्रानुस्वारस्य पक्षेऽनुनासिका यवलाः। मो राजि समः क्वौ।(१५) ८।३।२५ क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्॥ हे मपरे वा।८।३।२६

सि·कौ· १२

12

मपरे (१६) हकारे मस्य म एव स्याद्वा। ह्मल म्हल सञ्चलने। किम् ह्मलयति। किं ह्मलयति। ँः यवलपरे (७)
यवलाचेति वक्तव्यम्। ँ॥ यथासंख्यमनुदेशः समानाम्। १।३।१० समसम्बन्धी (१८) विधिर्यथा
संख्यं (१९) स्यात्। किंह्यः। कियँ ह्यः। किं ह्वलयति। किवँ ह्वलयति। किंल्हादयति। किलँ
ल्हादयति। नपरे नः। ८।३।२७। नपरे हकारे मस्य नः स्याद्वा। किं ह्नुते। किन् ह्नुते॥ ङ्णोः
कुक्टुक्शरि ८।३।२८ ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि। कुक्टुकोरसिद्धत्वात्
त्र= जश्त्वं न। ँ। चयो द्वितीयाः (२०) शरि पौष्करसादेरिति वाच्यम्। ँ। प्राङ्‌षष्ठः। प्रा ङ्‌खष्ठः [margin: ङकारसीदति इति पुष्करसाद् पुष्करसादस्यापत्यं पौष्करसादि॥ तस्य।=]
ङ्ख्षष्ठः। प्राङ्‌षष्ठः। सुगण्ट्‌षष्ठः। सुगण्ठ्‌षष्ठः। ड्‌ः सि धुट् ८।३।२९ डात्परस्य
सस्य (२१) धुड्वा स्यात्। षट्त्सन्तः। षट्सन्तः॥ नश्च ८।३।३० नकारान्तात्सस्य (२२) धु
ड्वा स्यात्। सन्त्सः। सन्सः॥ शि तुक् ८।३।३१ नस्य पदान्तस्य शे परे तुग्वा स्यात्। श
श्छोऽटीति छत्वविकल्पः। पक्षे झरो झरीति चलोपः। सञ्छम्भुः। सञ्च्छम्भुः। सञ्चशम्भुः।
सञ्शम्भुः॥ ञछौ ञचछौ ञचशौ ञशाविति चतुष्टयम्। रूपाणामिह तुक्छत्वचलोपा
नां विकल्पनात्॥ ङमो ह्रस्वादचि ङमुण्नित्यम्। ८।३।३२ ह्रस्वात्परो यो ङम् तदन्तं (२३)

यत्वदं तस्मात्परस्याऽचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः॥ समः
सुटि। ८।३।५। समो रुः स्यात्सुटि। अत्रेलोन्त्यस्य॥ अत्राऽनुनासिकः पूर्वस्य तु (२४) वा। ८।३।२। अत्र
रुप्रकरणे रोः पूर्वस्याऽनुनासिको वा स्यात्॥ अनुनासिकात्परोऽनुस्वारः ८।३।४। अनुनासि
(२५) = कं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात्। खरवसानयोर्विसर्जनीयः॥ विसर्जनीय
(२६) = स्य सः ८।३।३४। खरि विसर्जनीयस्य सः स्यात्। एतदपवादेऽमैवा शरीति वार्तिके विसर्गप्राप्ते।
ँ। सम्पुङ्कानां सो वक्तव्यः (२७) ँ। संस्कर्ता। सँस्कर्ता। समो वा लोपमेके इति भाष्यम्। लो
पस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयं द्विसकारत्वं तमेव। त
त्रानचि चेति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्। अनुस्वार विसर्ग जिह्वामू
लीयोपध्मानीयानामकारोपरि (२८) शर्षु च पाठस्योपसंख्यातत्वेनाऽनुस्वारस्याच्
(२९) त्वात्। अनुनासिकवतां त्रयाणां शरः खय इति द्वित्वे षट्। अनुस्वारवतामनु
स्वारस्यापि द्वित्वे द्वादश। एवमष्टादशानां तकारस्य द्वित्वे वचनान्तरेण (३०) षु

सि॰ कौ॰
१२
13

नर्द्धित्वेतु एकतं क्षितं त्रितमिति चतु र्थ्यव्याशत। यणोऽनुनासिकत्वेऽयोत्तर शातम्॥ पुमः (३२)
खय्यम्परे ८।३।६। अम्परे खयि पुम् शब्दस्य रुः स्यात्। उत्पत्तिवते (३३) ऽत्ययस्येति षत्व
पर्युदासात् + क ᳲ पयोः प्राप्तौ अप्युत्पत्तिवदेतु षत्वप्राप्तौ। ॐ। सं पुङ्कानामिति सः। पुंस्को
किलः। पुंस्पुत्रः। पुँस्पुत्रः। अम्परे किम्। पुंक्षीरम्। खयि किम्। पुंदासः। ॐ। ख्याञादे
शेन ॐ। पुंख्यानम्॥ नश्छव्यप्रशान् ८।३।७॥ अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्।
नतु प्रशान् शब्दस्य। विसर्गः सत्वं श्चुत्वम्। शार्ङ्गिँश्छिन्धि। शार्ङ्गिंश्छिन्धि। चक्रिँ
स्त्रायस्व। चक्रिंस्त्रायस्व। पदस्य किम्। हन्ति। अम्परे किम्। सन्त्सरुः। खड्गमुष्टिः। अप्र
शान् किम्। प्रशान्तनोति॥ नॄन् (३३) पे ८।३।१० नॄन् नित्यस्य रुः स्याद्वा पकारे परे॥ कु
प्वोः + क ᳲ पौच ८।३।३७ कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानी
यौ स्तः चाद्विसर्गः (३४)। शर्परे (३५) नाप्राप्त इति न्यायेन विसर्जनीयस्य स इत्यस्याप
वादोयम्। नतु शर्परे विसर्जनीय इत्यस्य। तेन वासः क्षौममित्यादौ विसर्ग एव। नॄँ

(margin) या॰ नैयेनन्नाप्राप्तो विधिरारभ्यते स तस्य वाधको भवति।

(margin) प॰ सि॰ कौ॰ १२

नॄं ँ पाहि । नॄँः पाहि । नॄंः पाहि । नॄन् पाहि ॥ कान् (३६) आम्रेडिते । ८।३।१२ कान्नकारस्य रुः स्यादाम्रेडिते परे । संपुङ्कानामिति सः । यद्वा (३७) । कस्कादिषु च । ८।३।४८ एष्विण (३८) उत्तरस्य विसर्गस्य षः स्यादन्यस्य तु सः । + कंृ ँ पयोरपवाद इति सः । काँस्कान् कांस्कान् । कस्कः । कौतस्कुतः । सर्पिष्कुण्डिका । धनुष्कपालम् ॥ आकृतिगणोऽयम् ॥ संहितायाम् (३९) ६।१।७२ । इत्यधिकृत्य ॥ छे च । ६।१।७३ । ह्रस्वस्य (४०) छे परे तुगागमः स्यात्संहितायाम् । चुत्वस्यासिद्धत्वाज्जश्त्वेन दः । ततश्चर्त्वस्यासिद्धत्वात्पूर्वं श्चुत्वेन जः । तस्य चर्त्वेन च । चुत्वस्यासिद्धत्वाच्चोः कुरिति कुत्वं न । शिवच्छाया । स्वच्छा । (४१) । आङ्माङोश्च । ६।१।७४ एतयोश्छे परे तुक् स्यात्पदान्ताद्वेति । [illegible] विकल्पापवादः । आच्छादयति । माच्छिदत् ॥ दीर्घात् ६।१।७५ दीर्घाच्छे परे तुक् स्यात् । दीर्घस्यायं (४२) तुक् न तु छस्य सेनासुराच्छायेति ज्ञापकात् । चेच्छिद्यते ॥ पदान्ताद्वा ६।१।७६ । दीर्घात् (४३) पदान्ताच्छे परे तुग्वा स्यात् । लक्ष्मीछाया । लक्ष्मीच्छाया ॥ इति हल्सन्धि

[illegible]

लि॰ कौ॰
१४
15

विसर्जनीयस्य (१) सः। विष्णुस्त्राता। शर्परे विसर्जनीयः। ८।३।३५ शर्परे (२) खरि विसर्जनीयस्य वि
सर्जनीयो न त्वन्यत् (३)। कः त्सरुः। घनाघनः क्षोभणः। इह यथायथं सत्वं जिह्वामूलीयश्च न।
वा शरि ८।३।३६। शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते। हरिश्शेते। ॥
खर्परे शरि वा विसर्गलोपो वक्तव्यः। ॥। रामस्थाता। रामः स्थाता। हरिस्फुरति। हरिः स्फुरति।
पक्षे विसर्गः सत्वं च त्रैरूप्यम्॥ कुप्वोः ≍क ≍पौ च॥ क ≍करोति। कः करोति। क ≍खनति। कः
खनति। क ≍पचति। कः पचति॥ सोऽपदादौ ८।३।३८ विसर्जनीयस्य सः स्यात् अपदाद्योः (४)
कुप्वोः परयोः। ॥। पाशकल्पककाम्येष्विति (५) वाच्यम्। ॥। पयस्पाशं। यशस्कल्पम्। यशस्क
म्। यशस्काम्यति। ॥। अनव्ययस्येति (६) वाच्यम् ॥। प्रातःकल्पम्। ॥ काम्ये रोरेवेति
वाच्यम्। ॥। नेह। गीः काम्यति॥ इणः (७) षः ८।३।३९ इणः परस्य विसर्गस्य षकारः स्या
त्पूर्वविषये। सर्पिष्पाशम्। सर्पिष्कल्पम्। सर्पिष्कम्। सर्पिष्काम्यति॥ नमस् (८) पुरसो
र्गत्योः। ८।३।४०। गतिसंज्ञयोरनयोर्विसर्गस्य सः कुप्वोः परयोः। नमस्करोति। साक्षात्

र्थत्वात् कृञोयोगे विभाषया गतिसंज्ञा। तदभावे नमः करोति। पुरोऽव्ययमिति नित्यंगति
संज्ञा। पुरस्करोति। अगतित्वान्नेह। पूः पुरौ पुरः प्रविष्टव्याः॥ इदुदुपधस्य (९) चाप्रत्ययस्य।
८।३।४१ इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः। निष्प्रत्यूहम्। आविष्कृते
म्। दुष्कृतम्। अप्रत्ययस्य किम्। अग्निः करोति। वायुः करोति। एकादेशशास्त्रनिमित्तकस्य
(१०) न षत्वम्। कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात्। तेनेह न भ्रातुः कृपा। ःः। मुहुसः
प्रतिषेधः। मुहुः कामा॥ तिरसोऽन्यतरस्याम्। ८।३।४२ तिरसः (११) सो वा स्यात् कुप्वोः
। तिरस्कर्त्ता। तिरः कर्त्ता॥ द्वित्रिश्चतुरिति कृत्वोऽर्थे ८।३।४३ कृत्वोऽर्थे वर्तमानानामेषां विसर्ग
स्य षकारो वा स्यात् कुप्वोः॥ द्विष्करोति। द्विः करोति इत्यादि। कृत्वोऽर्थे किम्। चतुष्कपालः
(१२)॥ इसुसोः (१३) सामर्थ्ये ८।३।४४। एतयोर्विसर्गस्य षः स्याद्वा कुप्वोः। सर्पिष्करोति। सर्पिः
करोति। धनुष्करोति। धनुः करोति। सामर्थ्यमिह व्यपेक्षा (१४)। सामर्थ्ये किम्। तिष्ठतु स
र्पिः। पिबत्वमुदकम्॥ नित्यं समासेऽनुत्तरपदस्थस्य। ८।३।४५ इसुसोर्विसर्गस्यानुत्त

रपदस्यस्य समासे नित्यं षः स्यात् कुप्वोः परयोः । सर्पिष्कुण्डिका । अनुत्तरपदस्यस्य किम् ।
सि॰कौ॰ १५ परमसर्पिः कुण्डिका । कस्कादिषु सर्पिष्कुण्डिका शब्दोऽसमासे व्यपेक्षाविरहेऽपि षा-
त्वार्थो व्यपेक्षायां नित्यार्थश्च ॥ अतः (१५) कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्यय
15 स्य ८।३।४६। अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात् करो
त्यादिषु परेषु नत्तरपदस्यस्य । अयस्कारः । अयस्कामः । अयस्कंसः । अयस्कुम्भः । अ अयस्लोहम् ॥
यस्पात्रम् । अयः सहिता कुशा । अयस्कुशा । अयस्कर्णी । अतः किम् । यशः करोति । याज्ञिको =
अनुत्तरपदस्यस्य किम् । परमयशः कारः ॥ अधः शिरसी पदे ८।३।४७ एतयोर्विसर्ग
स्य सादेशः स्यात्पदशब्दे परे । अधस्पदम् । शिरस्पदम् । समास इत्येव । अधः पदम्
। शिरः पदम् । अनुत्तरपदस्यस्येत्येव । परमशिरः पदम् । कस्कादिषु च । भास्करः (१६)
। इति विसर्गसन्धिः समाप्तम् ॥ स्वौजसमौडिति सुत्रत्रये शिवसू अर्चा इति शिष्यते ।
ससजुषो रुः ८।२।६६ पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात् । जश्त्वापवादः ॥

अतोरोरप्लुतादप्लुते। ६।१।११३ अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। भो भगो अघो इति प्राप्तस्य य
त्वस्यापवादः। उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति। रुत्वमनूद्य उत्वविधेः सामर्थ्यात्। प्रथमयोः
(१) पूर्वसवर्णः। ६।१।१०२ अकः प्रथमद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात्।
इति प्राप्ते। नादिचि ६।१।१०४। अवर्णादिचि परे न पूर्वसवर्णदीर्घः। आद्गुणः (२)। एङः पदान्ता
दति। शिवोऽर्च्यः। अत इति तपरः किम्। देवा अत्र। अतीति तपरः किम्। श्व आगन्ता।
अप्लुतात्किम्। एहि सुस्रोत ३ः (३) अत्र स्नाहि। प्लुतस्यासिद्धत्वादतः परोऽयम्। अप्लु
तादिति विशेषणेन तु तत्सामर्थ्यान्नासिद्धत्वम्। तपरकरणस्य तु न सामर्थ्यं दीर्घनिवृत्त्या
चरितार्थत्वात्। अप्लुते किम्। तिष्ठतु पय अ३ग्निदत्त। गुरोरनृत इति प्लुतः। हशि
च। ६।१।११४ अप्लुतादतः परस्य रोरुः स्याद्धशि। शिवो वन्द्यः। रोरित्युकारानुबन्धग्रह
णान्नेह। प्रातरत्र। धातर्गच्छ। देवास् इह इति स्थिते। रुत्वम्। भोभगोअघोअवर्ण

पूर्वत्राऽसिद्धम् ८।२।१॥

सि॰कौ॰
१६

16

एतत्पूर्वस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः (४)। लोपः शाकल्यस्य। देवा इह। देवा
यिह। अशि किम्। देवाः सन्ति। यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते तथापि विसर्ग
स्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्। न ह्ययमल्विधिः (५) रोरिति समुदायरूपाश्रयणात्।
भोस् भगोस् अघोस् इति सकारान्ता निपाताः। तेषां रोर्यत्वे कृते॥ व्योर्लघुप्रयत्नतरः शा
कटायनस्य।८।३।१८। पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे। यस्यो
च्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं स लघूच्चारणः॥ ओतो गार्ग्यस्य।८।३।२०। ॥
ओकारात्परस्य पदान्तस्य लघुप्रयत्नस्य यकारस्य (६) नित्यं लोपः स्यात्। गार्ग्यग्र
हणं पूजार्थम्। भो अच्युत। लघुप्रयत्नपक्षे भोयच्युत। पदान्तस्य किम्। तोयम्। उ
ञि च पदे ८।३।२१। अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोप उञि परे। स उ एकाग्निः। ल
पदे किम्। तन्त्रयुतम्। (७) वेञः संप्रसारणे रूपम्। यदि तु प्रति पदोक्तो निपात उ

शि॰कं॰
१६

तर्हि उत्तरार्थं (८) पदग्रहणम्। हलि सर्वेषाम् ८।३।२२ भोभगोअघोअपूर्वस्य लघूच्चारणस्य य
कारस्य लोपः स्याद्धलि सर्वेषां मतेन। भो देवाः। भो लक्ष्मि। भो विद्वद्वृन्द। भगो नमस्ते। अघो
याहि। देवा नम्याः। देवा यान्ति। हलि किम्। देवाविह।। रोऽसुपि (९)। ८।२।६९। अह्नो रेफा
देशः स्यादसुपि। रोरपवादः। अहरहः। अहर्गणः। असुपि किम्। अहोभ्याम्। अत्राह
न्निति रुत्वम्। उं:। रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्। उं:। अहोरूपम्। गतमहोरेषा। रात्रि=५
एकदेशविकृतस्यानन्यत्वात्। अहोरात्रः। अहोरथन्तरम्। अहरादीनां पत्यादिषु
वा रेफः। विसर्गापवादः (१०)। अहर्पतिः। गीर्पतिः। धूर्पतिः। पक्षे विसर्गोपध्मानी
यौ। रोरि ८।३।१४। रेफस्य रेफे परे लोपः स्यात्। ढ्रलोपे पूर्वस्य दीर्घोऽणः। ६।३।१११।
ढरेफौ लोपयतीति (११) तथा तस्मिन्वर्णे अर्थात् ढकाररेफात्मके परे पूर्वस्याऽ
णो दीर्घः स्यात्। पुनारमते। हरी रम्यः। शम्भू राजते। अणः किम्। तृढः। वृढः।

सि॰ कौ॰
७

17

स्तृहू हिंसायाम् । तृहू उद्यमने । पूर्वत्रग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घार्थम् । अज
घीः (१२) । लीढः । मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति लोपे च प्राप्ते । विप्र
तिषेधे (१३) परं कार्यम् । १।४।२। तुल्यबलविरोधे परं कार्यं स्यात् । इति लोपे प्राप्ते पू
र्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव । मनोरथः । एतत्तदोः सु (१४) लोपोऽको
रनञ्समासे हलि । ६।१।१३२। अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु
नञ्समासे । एष विष्णुः । स शम्भुः । अकोः (१५) किम् । एषको रुद्रः । अनञ्
समासे किम् । असशिवः । हलि किम् । एषोऽत्र । सोऽचि लोपे चेत्पादपूरणम्
।६।१।१३४। स इत्यस्य (१६) सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत । सेमामवि
ड्ढि प्रभृतिम् । इह ऋक्पाद एव गृह्यत इति वामनः । अविशेषाच्छ्लोकपादोऽपी
त्यपरे । सैष दाशरथी रामः । लोपे चेदिति किम् । स इत्वैते । स एव मुक्त्वा । सत्ये

त्येव धर्म एतु स्यश्छन्दसि बहुलमिति पूर्वसूत्रा
द्बहुलग्रहणानुवृत्त्या लभ्यते तेनेह न । सोऽहमाजन्म
शुद्धानाम् । इति स्वादिसन्धिः सम्पूर्णम् । शुभमस्तु ॥

शि॰ प॰
७

अर्थो विद्यते यस्मिन् तत् अर्थवत्=१ कृच्च तद्धितश्च समासश्च ते कृत्तद्धितसमासाः=२

प्रतिपदं प्रतिपदस्येव इति = पदं पदं प्रति इ तिष्ठा प्रातिपदिकं=३

॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्द
रूपं प्रातिपदिकसंज्ञं स्यात् ॥ कृत्तद्धितसमासाश्च १।२।४६ कृत्तद्धितान्तौ समासश्च प्रातिपदि
कसंज्ञाः स्युः ॥ पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम् ॥ यत्र संघाते पूर्वो भागः पदं तस्य चे
द्भवति तर्हि समासस्यैवेति । तेन वाक्यस्य न ॥ प्रत्ययः ३।१।१ आपञ्चमपरिसमाप्तेरधिकारो
ऽयम् ॥ परश्च ३।१।२ अयमपि तथा ॥ ङ्याप्प्रातिपदिकात् ४।१।१ ङ्यन्तादाबन्तात्प्रातिपदि
काच्चेत्यापञ्चमपरिसमाप्तेरधिकारः ॥ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्येव
सिद्धे ङ्याब्ग्रहणं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात् । ङ्याप् भ्याम्भ्राङ्ग्रा मूदित्येवमर्थम्॥
स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ४।१।२ ङ्य
न्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः ॥ सुङस्योरुकारेकारौ जश्शटङपा

ङीप् च आप् च ङ्याप् ङ्याप् च प्राति
पदिकं च एषां समा
हारः ङ्याप्प्रातिपदि
कं तस्मात्=४

सि॰ कौ॰
१८

18

विभज्यन्ते प्रकृतिप्रत्ययाद्यर्थी याभ्यां सा विभक्तिः =

विभक्तिश्च १।४।१०४ सुप्तिङौ विभक्तिसंज्ञौ स्तः। तत्र सु औ जस् इत्यादीनां संज्ञानां त्रिकाणां प्रथ
मादयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहाधिव्यवहारः॥ सुपः १।४।१०३ सुपस्त्रीणि त्रीणि
वचनानि एकैकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः॥ द्व्येकयोर्द्विवचनैकवचने
१।४।२२ द्वित्वैकत्वयोरेते स्तः। बहुषु बहुवचनम् १।४।२१ बहुत्वे एतत्स्यात्॥ रुत्व
विसर्गौ। रामः। सरूपाणामेकशेष एकविभक्तौ १।२।६४ एकविभक्तौ यानि सरूपाण्येव
दृष्टानि तेषामेक एव शिष्यते॥ प्रथमयोः पूर्वसवर्णः। नादिचि। वृद्धिरेचि। रामौ।
चुटू १।३।७ प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्य इत्संज्ञा। न विभक्तौ तुस्माः १।३।४
विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः। इति सकारस्य नेत्त्वम्। अतो गुणे ६।१।९७
अपदान्तादतो गुणे परतः पररूपमेकादेशः स्यात्। इति प्राप्ते। परत्वात्॥

द्वौ च एकश्च द्व्येकौ तयोः द्व्येकयोः =

समानं रूपं येषां ते सरूपास्तेषां =

चुश्च टुश्च चुटू तयोः समाहारः चुटु = ३

सकृद्गतौ यद्बाधितं तद्बाधितमेव ॥२२॥ पुनः प्रसङ्गविज्ञानात्सिद्धं २२ तो सत्र इति सूत्र स्याबकात्र पुनः वृद्धिः रामौ ॥ इति =

र्वे सवर्णदीर्घः ॥ अतो गुणे इति हि परत्वादपवादो ऽनन्तरान् विधीन् बाधन्ते नोत्तरानिति
त्य= न्यायेनाकः सवर्णे दीर्घ इत्यस्यैवापवादो न तु प्रथमयोरित्यस्यापि ॥ रामाः ॥ एकवचनं सम्बुद्धिः
२।३।४९ सम्बोधने प्रथमायाएकवचनं सम्बुद्धिसंज्ञं स्यात् ॥ एङ्ह्रस्वात्सम्बुद्धेः ।६।१।६९। एङ् च ह्रस्वश्च अनयोः समाहारः एङ्ह्रस्वं तस्मात्=
एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत् । सम्बुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशे
षणान्नेह । हे कतरत् कुलेति । हे राम । हे रामौ । हे रामाः । एङ्ग्रहणं किम् । हे हरे । हे वि
ष्णो । अत्र हि परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति ॥ अमिपूर्वः ६।१।
१०७। अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात् । रामम् । रामौ । लशक्वतद्धिते १।३।८
तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः ॥ इति शसः शस्येत्संज्ञा ॥ तस्माच्छसो नः
पुंसि ।६।१।१०३ पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात् पुंसि ॥ अट्कु

सि. कौ.
१९

19 सुवर्ण=

पवाङ्नुम्व्यवायेऽपि ।८।४।२। अट् कवर्ग पवर्गः आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च
व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे ॥ पदव्यवायेऽपीति निषेधं बाधि
तुमाङ्ग्रहणम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थम् ॥ तच्चाकर्तुं शक्यम् । अयोगवाहा
नामट्सूपदेशस्योक्तत्वात् । इति णत्वप्राप्ते ॥ पदान्तस्य ।८।४।३७ पदान्तस्य नस्य णत्व
न्न स्यात् । रामान् । यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ।१।४।१३ यः प्रत्ययो यस्मा
त् क्रियते तदादि शब्दरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं स्यात् । भवामि । भविष्यामी
त्यादौ विकरणविशिष्टस्याऽङ्गसंज्ञार्थं तदादि ग्रहणम् । विधिरिति किम् । स्त्री
इयती । प्रत्यये किम् । प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वामाभूत ॥ अङ्गस्य
।६।४।१। इत्यधिकृत्य ॥ टाङसिङसामिनात्स्याः ।७।१।१२ अकारान्तादङ्गाट्टादी

शब.
१९

नेनाङ्ङसादिनादय आदेशाः स्युः । णत्वम् । रामेण । सुपि च ७।३।१०२ यञादौ सुपि पर
रे अतोऽङ्गस्य दीर्घः स्यात् ॥ रामाभ्याम् । अतो भिस ऐस् ७।१।९ अकारान्तादङ्गाद्भिस
ऐस् स्यात् । अनेकाल्त्वात्सर्वादेशः ॥ रामैः । ङेर्यः ७।१।१३ अतोऽङ्गात्परस्य ङेरि
त्यस्य यादेशः स्यात् । रामाय । इह स्थानिवद्भावेन यादेशस्य सुप्त्वात्सुपि चेति दीर्घः ।
सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषा तु नेह प्रवर्तते कष्टा-
य क्रमणे इति निर्देशेन तस्या अनित्यत्वज्ञापनात् । रामाभ्याम् । बहुवचने झल्येत् ।
७।३।१०३ झलादौ बहुवचने सुपि परे अतोऽङ्गस्य एकारः स्यात् । रामेभ्यः । बहुवचने
किम् । रामः रामस्य । झलि किम् । रामाणाम् । सुपि किम् । पचध्वम् । जश्त्वम् ।
वाऽवसाने ८।४।५६ । अवसाने झलां चरो वा स्युः । रामात् । रामाद् । द्वित्वे रूप

सि॰ कौ॰
२०

20

चतुष्टयम्। रामाभ्याम्। रामेभ्यः। रामस्य। सस्य द्वित्वपक्षे खरि चेति चर्त्वेऽप्यान्तर
तम्यात्स एव। न तु तकारः अल्पप्राणतया। प्रयत्नभेदात्। अत एव सः सीति
तादेशो नारभ्यते। ओसि च ७।३।१०४ ओसि परे अतोऽङ्गस्य एकारः स्यात्।
रामयोः। ह्रस्वनद्यापो नुट् ७।१।५४ ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो
नुडागमः स्यात्॥ नामि। ६।४।३ नामि परे ऽजन्ताङ्गस्य दीर्घः स्यात्। रामाणा
म्। सुपि चेति दीर्घो यद्यपि परस्तथापीह न प्रवर्त्तते सन्निपातपरिभाषावि
रोधात्। नामीत्यनेन त्वारम्भसामर्थ्यात् परिभाषा बाध्यते। रामे। रामयोः।
सुपि एत्वे कृते। अपदान्तस्य मूर्द्धन्यः। ८।३।५५ आपादपरिसमाप्तेरधि
कारोऽयम्॥ इण्कोः ८।३।५७ इत्यधिकृत्य। आदेशप्रत्यययोः ८।३।५९।

पं=१

शिव॰
२०

सहेः साडः सः इति सूत्रात्स इति षष्ठ्यन्तमपदमनुवर्त्तते। इण्कवर्गाभ्यां परस्या
पदान्तस्यादेशस्य प्रत्ययावयवस्य च यः सकारस्तस्य मूर्द्धन्यादेशः स्यात्।
विवृताघोषस्य सस्य तादृश एव षः॥ रामेषु। इण्कोः किम्। रामस्य।
आदेशप्रत्यययोः किं। सुपीः। सुपिसौ। सुपिसः। अपदान्तस्य किम्। हरि
स्तत्र। एवं कृष्णमुकुन्दादयः॥ सर्वादीनि सर्वनामानि। १।१।२७। सर्वा
दीनि शब्दरूपाणि सर्वनामसंज्ञानि स्युः। तदन्तस्यापीयं संज्ञा द्वन्द्वे चेति ज्ञा
पकात्। तेन परमसर्वत्रेति त्रल् परमभवकानित्यत्राकच्च सिध्यति। ज
सः शी। ७।१।१७। अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्स
र्वादेशः। नचाऽर्द्ध एश्चित्त्वाद्दाविव नानुबन्धकृतमनेकाल्त्वमितिवा सि॰

सि.कौ. २३ सर्वादेशत्वात्त्वाभित्संज्ञाया एवाभावात् । सर्वे ॥ सर्वनाम्नः स्मै ।७।१।१४ अतः सर्वनाम्नो ङे इत्यस्य
स्मै स्यात् । सर्वस्मै । ङसिङ्योः स्मात्स्मिनौ ।७।१।१५। अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः । सर्वस्मात् ।
आमि सर्वनाम्नः सुट् ।७।१।५२। अवर्णान्तात्सर्वनाम्नो विहितस्यामः सुडागमः स्यात् । एत्वषत्वे ।
21 सर्वेषाम् । सर्वस्मिन् । शेषं रामवत् । एवं विश्वादयोऽप्यदन्ताः । सर्वादयश्च पञ्चत्रिंशत् ।
सर्व विश्व । उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । पूर्व
परावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं
बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद्
भवत् किम् । इति । उभशब्दो द्वित्वविशिष्टस्य वाचकः । अत एव नित्यं द्विवचनान्तः । तस्ये
ह पाठस्तु उभकावित्यकजर्थः नच कप्रत्ययेनेष्टसिद्धिः द्विवचनपरत्वाभावे नोभयत ।

उभयतेत्यादाविवायच्प्रसङ्गात्। तदुक्तमुभयोऽन्यत्रेति अन्यत्रेति द्विवचनपरत्वाभावे उभयशब्दस्य द्विवचनन्ना
स्तीति कैयटः। अस्तीति हरदत्तः। तस्माज्जस्ययजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्त तया प्रथमचरमेति विक
ल्पेप्राप्ते विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वान्नित्यैव संज्ञा भवति। उभये। डतरडतमौ प्रत्ययौ। यद्यपि संज्ञाविधौ प्रत्यय
ग्रहणे तदन्तग्रहणन्नास्ति सुप्तिङन्तमिति ज्ञापकात्। तथापीह तदन्तग्रहणं केवलयोः संज्ञायाः प्रयोजनाभा
वात्। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्विबहुविषये निर्द्धारणे वर्तते। तत्रान्यतमशब्दस्य गणेपा
ठाभावान्न संज्ञा। त्वत्वेति द्वावप्यदन्तावन्यपर्यायौ। एक उदात्तोऽपरोऽनुदात्त इत्येके। एकस्वान्त इत्यपरे। नेम
इत्यर्द्धे। समः सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते यथासंख्यमनुदेशः समानामिति ज्ञापकात्। अन्तरं
बहिर्योगेति गणसूत्रेऽपुरीति वक्तव्यम्। अन्तरायां पुरि॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थाया
मसंज्ञायाम्।१।१।३४। एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात्॥
पूर्वे पूर्वाः। स्वाभिधेयापेक्षोऽवधिनियमो व्यवस्था। व्यवस्थायां किम्। दक्षिणा गाथकाः कुशला इत्यर्थः।
असंज्ञायां किम्। उत्तराः कुरवः॥ स्वमज्ञातिधनाख्यायाम्।१।१।३५। ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता
संज्ञा सा जसि वा स्यात्॥ स्वे स्वाः आत्मीया इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः ज्ञात = सि० कौ०

सि·कौ·
२२

22

अन्तरं बहिर्योगोपसंव्यानयोः ।१।१।३६ बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात् । अन्तरे
अन्तरा वा गृहाः बाह्याः इत्यर्थः । अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः ॥ पूर्वादिभ्यो नवभ्यो वा ।७।१।
१६। एभ्यो ङसिङ्योः स्मात् स्मिनौ वा स्तः । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । एवम्परादीनामपि । शेषं सर्ववत् ।
एकशब्दः संख्यायां नित्यैकवचनान्तः ॥ न बहुव्रीहौ ।१।१।२९ बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात् । त्व
कम्पिता यस्य स त्वत्कपितृकः । अहकम्पिता यस्य स मत्कपितृकः । इह समासात् प्रागेवालौकिके प्रक्रिया
वाक्ये सर्वनामसंज्ञा निषिध्यते । अन्यथा लौकिके विग्रहवाक्य इव तत्रा. प्यकच् प्रत्यये कृते स च
समासेऽपि श्रूयेत अतिक्रान्तो भवकन्तमति भवकानितिवत् । भाष्यकारस्तु त्वकत्पितृको मक
त्पितृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ । यथोत्तरं मुनीनां प्रामाण्यम् ॥ ६ । संज्ञो
पसर्जनीभूतास्तु न सर्वादयः । ७ । महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशात् । अतः संज्ञा
कार्यमन्तर्गणकार्यं च तेषां न भवति । सर्वो नाम कश्चित्तस्मै सर्वाय देहि । अतिक्रान्तः सर्वमति सर्व
स्तस्मै अतिसर्वाय । अतिकतरं कुलम् । अतितत् ॥ तृतीयासमासे ।१।१।३०। अत्र सर्वनामता न स्यात् ॥
मासपूर्वाय । तृतीयासमासार्थवाक्येऽपि न । मासेन पूर्वाय ॥ द्वन्द्वे च ।१।१।३१ द्वन्द्वे उक्ता संज्ञा न ।

शिव·
२२

वर्णाश्रमेतराणाम् । समुदायस्यायं निषेधो नत्ववयवानाम् । पूर्वावरावराणाम् । नचैवं तदन्त
विधिना तुट्प्रसङ्गः । सर्वनाम्नो विहितस्यामः सुडितिव्याख्यातत्वात् ॥ विभाषा जसि १।१।३२
जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्तासंज्ञा वा स्यात् ॥ वर्णाश्रमेतरे वर्णाश्रमे
तराः ॥ शीभावमात्रस्यैव विभाषेत्युक्तम् ॥ अतो नाकच् किन्तु कप्रत्यय एव । वर्णाश्रमेतरकाः ॥
प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ।१।१।३३। एते जसः कार्यमात्रं प्रत्युक्तसंज्ञा वा स्युः । प्रथमे
प्रथमाः । इत्यादि । शेषं रामवत् । तयप् प्रत्ययस्तत स्तदन्ता ग्राह्याः । द्वितये द्वितयाः ।
नेमे नेमाः । शेषं सर्ववत् । ङे । विभाषा प्रकरणे तीयस्य ङित्सूपसंख्यानम् ॥ ङे । द्वि
तीयस्मै । द्वितीयायेत्यादि । एवं तृतीयः । अर्थवद्ग्रहणान्नेह । पटुजातीयाय ॥ ज
राया जरसन्यतरस्याम् ।७।२।१०१। जराशब्दस्य जरस्वा स्यादजादौ विभक्तौ । पदाङ्गा
धिकारे तस्य तदन्तस्य च । अनेकाल्त्वात्सर्वादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति ।
एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस् । निर्जरसौ । निर्जरसः । इत्यादी न्

सि·कौ·
२३

23

बाधित्वा परत्वाज्जरस् । निर्जरसा । निर्जरसे । निर्जरसः । पदेहलादौ च रामवत् । एतत्कृतात्तु पूर्ववि
प्रतिषेधेन इनातोः कृतयोः सन्निपातपरिभाषया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसि
न निर्जरसादिति रूपं न तु निर्जरसा निर्जरस इति केचिदित्युक्तम् । तथा भिसि निर्जरसैरिति
रूपान्तरमुक्तम् । तदनुसारिभिश्च षष्ठ्येकवचने निर्जरस्येत्येव रूपमिष्टमिति स्वीकृतमेतच्च भा
ष्यविरुद्धम् ॥ पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु । ६।१।६३।
पाददन्त नासिका मासहृदय निशा असृज् यूष दोषन् यकृत् शकृत् उदक आसन् एषां पदादय
आदेशाः स्युः । शसादौ वा । यत्तु आसनशब्दस्य आसन्नादेश इति नाशिकायां यातु मुक्तं त
त्प्रामादिकम् । पादः । पादौ । पादाः । पादम् । पादौ । पदः । पादान् । पादेन । पदा इत्या
दि ॥ सुडनपुंसकस्य । १।१।४३ । सुट्प्रत्याहारः । स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञा
नि स्युरक्लीबस्य ॥ स्वादिष्वसर्वनामस्थाने । १।४।१७ कप्प्रत्ययावधिषु स्वादिष्वसर्वनाम
स्थानेषु परतः पूर्वं पदसंज्ञं स्यात् ॥ यचि भम् । १।४।१८ । यकारादिष्वजादिषु च क

प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः
पूर्वं भसंज्ञं स्यात् ॥

शिव·
२३

आकडारादेका संज्ञा १।४।१ इत ऊर्द्ध्वं कडाराः कर्म्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया। या
परानवकाशा च। तेन शसादावचि भसंज्ञैव न पदत्वम्। अतो जश्त्वन्न। दतः। दता।
जश्त्वं दद्भ्यामित्यादि। मासः। मासा। भ्यामि रुत्वे यत्वे च यलोपः। माभ्याम्। माभिरि
त्यादि॥ अल्लोपोऽनः। ६।४।१३४। अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन्
तस्याकारस्य लोपः स्यात्॥ रषाभ्यांनोणः समानपदे॥ ८।४।१। एकपदस्थाभ्यां रेफ
षकाराभ्याम्परस्य नस्य णः स्यात्॥ यूष्णः। यूष्णा। पूर्वस्मादपि विधौ स्थानिवद्भाव
इति पक्षे तु अड्व्यवाय इत्येवात्र णत्वम्। पूर्वत्रासिद्धे न स्थानिवदिति तु इह ना
स्ति तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात्॥ नलोपः प्रातिपदि
कान्तस्य। ८।२।७। नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं
यत्पदं तदन्तस्य नकारस्य लोपः स्यात्। नलोपस्यासिद्धत्वाद्दीर्घमेत्वमैत्त्व
ञ्च न। यूषभ्याम्। यूषभिः। यूषभ्य इत्यादि॥

सि॰कौ॰
२४

24

विभाषा ङिश्योः ।६।४।१३६। अङ्गावयवोऽसर्वनामस्थानपरो योऽन् त।
स्याऽकारस्य लोपो वा स्यात् ङिश्योः परयोः । यूष्णि । यूषणि । पदे रामवत् । पद्दिति
सूत्रे प्रभृतिग्रहणं प्रकारार्थम् । तथाच । औङः श्यामपि दोषन्नादेशो भाष्ये ककु
द्दोषणी इत्युदाहृतम् । तेन पदङ्घ्रिश्चरणोऽस्त्रियां स्वान्तं हृन्मानसं मन इति सङ्
च्छते । आसन्यम्प्राणमूचुरिति च । आस्यभवः आसन्यः । दोश्शब्दस्य नपुंसकत्वम
तएव भाष्यात् । तेन दक्षिणं दोर्निशाचर इति सङ्गच्छते । भुजबाहू प्रवेष्टो दोरि
ति साहचर्यात्पुंस्त्वमपि । दोषन्तस्य तथाविधस्य भजत इति । द्वयोरह्नोर्भवो द्व्यह्नः । ह्नि
संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ।६।३।११०। संख्यादिपूर्वस्याह्नस्याहन्ना ह्नि
देशो वा स्यात् ङौ । द्व्यह्नि । द्व्यहनि । द्व्यह्ने । विगतमहः व्यह्नः । व्यह्नि । व्यहनि । पूह्नि
व्यह्ने । अह्नः सायः । सायाह्नः । सायाह्नि । सायाहनि सायाह्ने ।। इत्यदन्ताः ।। ह्न
विश्वपाः ।। दीर्घाज्जसि च ।६।२।१०५। दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णो

वृद्धिः ॥ विश्वपौ । सवर्णदीर्घः । विश्वपाः । यद्यपीह औङि नादिचीत्येव सिद्धं जसि तु सत्यपि पूर्वस-
वर्णदीर्घत्व तिनी सि । तथापि गौर्यौ गौर्य इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम् ॥ आ-
तो धातोः ।६।४।१४०। आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात् । अलोन्त्यस्य । विश्व-
पः । विश्वपाभ्यामित्यादि । एवं शंखध्मादयः । धातोः किम् । हाहान् । टा सवर्णदीर्घः । हाहा ।
ङे वृद्धिः । हाहै । ङसिङसोर्दीर्घः । हाहाः २ । ओसि वृद्धिः । हाहौः । ङौ आद्गुणः । हाहे । ए-
वं विश्वपावत् । आत इति योगविभागादधातोरप्याकारलोपः कैश्चित् । त्कैः । भ्नः । इत्या-
दन्ताः । हरिः । प्रथमयोः पूर्वसवर्णः । हरी । जसि च ।७।३।१०९। ह्रस्वान्तस्याङ्गस्य गुणः स्या-
ज्जसि परे । हरयः ॥ ह्रस्वस्य गुणः ।७।३।१०८। ह्रस्वस्य गुणः स्यात्सम्बुद्धौ । एङ्ह्रस्वादिति
सम्बुद्धिलोपः । हे हरे । हरिम् । हरी । हरीन् ॥ शेषो घ्यसखि ।१।४।७। अनदीसंज्ञौ ह्रस्वौ
यौ इवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् । शेषः किम् । मत्यै । एकसंज्ञाधिकारात्
सिद्धे शेषग्रहणं स्पष्टार्थम् । ह्रस्वौ किम् । वातप्रम्यै । यू किम् । मात्रे ॥ आङो नाऽस्त्रि-

ताम ।७।३।१०।

सि. कौ.
२५
28

घेः परस्याङो नास्याद स्त्रियाम् । आङिति टासंज्ञा प्राचाम् । हरिणा । अस्त्रियाङ्किम् । मत्या ॥
घेर्ङिति ।७।३।१११। घिसंज्ञस्य ङिति सुपि गुणः स्यात् ॥ हरये । घेः किम् । सख्ये । ङितिकिम् ।
हरिभ्याम् ॥ सुपि किम् । पट्वी । घेर्ङितीति गुणे कृते ॥ ङसिङसोश्च ।६।१।११०। एङो ङसि
ङसोरति परे पूर्वरूपमेकादेशः स्यात् ॥ हरेः । हरेः । हर्य्योः । हरीणाम् ॥ अच्च घेः ।७।३
।११९। इदुद्भ्यामुत्तरस्य ङेरौ स्यात् घेरन्तादेशश्चाकारः । हरौ । हर्य्योः । हरिषु । एवं श्री
पत्यग्निरव्यादयः ॥ अनङ् सौ ।७।१।९३। सख्युरङ्गस्यानङादेशः स्यादसम्बुद्धौ
सौ परे । ङिच्चेत्यन्तादेशः ॥ अलोन्त्यात् पूर्व उपधा ।१।१।६५। अन्त्यादलः पूर्वो वर्ण
उपधासंज्ञः स्यात् ॥ सर्वनामस्थाने चाऽसम्बुद्धौ ।६।४।८। नान्तस्योपधाया दीर्घः स्यादस
म्बुद्धौ सर्वनामस्थाने ॥ अपृक्त एकाल् प्रत्ययः ।१।२।४१। एकाल् प्रत्ययो यः सोऽपृक्त
संज्ञः स्यात् ॥ हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ।६।१।६८। हलन्तात्परं दी
र्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते ॥ हल्ङ्याब्भ्यः किम् ॥

ग्रामणीः । दीर्घात् किम् । निष्कौशाम्बिः । अतिखट्वः । सुतिसीति किम् । अभैत्सीत् । तिपा
सहचरितस्य ग्रहणात्सिचोऽग्रहणान्नास्ति । अपृक्तमिति किम् । बिभर्त्ति । हल्किम् । बिभेद ।
प्रथमहल्किम् । राजा । नलोपो न स्यात् संयोगान्तलोपस्यासिद्धत्वात् । सखा । हे सखे ॥
सख्युरसम्बुद्धौ । ७।१।९२ । सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् ॥
अचो ञ्णिति । ७।२।११५ । ञिति णिति च परेऽजन्ताऽङ्गस्य वृद्धिः स्यात् । सखायौ । स
खायः । सखायम् । सखायौ । घिसंज्ञाऽभावान्न तत्कार्य्यम् । सख्या । सख्ये ॥ ख्यत्या
त्परस्य । ६।१।११२ । खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसि
ङसोरत उत् स्यात् । सख्युः । सख्युः ॥ औत् । ७।३।११८ । इदुद्भ्यां परस्य ङेरौत् स्या
त् ॥ ईउकाराऽनुवृत्तिरुत्तरार्था ॥ सख्यौ । शेषं हरिवत् । शोभनः सखा सुसखा ।
सुसखायौ सुसखायः । अनङ्णिद्भावयोराङ्गत्वात्तदन्तेऽपि प्रवृत्तिः । समुदा
यस्य सखिरूपत्वाभावादसखीति निषेधाऽप्रवृत्तेर्घिसंज्ञा । सुसखिना ।

सि॰ कौ॰
२६

शाङ्क्री लांगुली कुशोत्तिवार्त्तिक घट घटीग्रहण मत्र लिंगम् = ४

26

सुसखये । ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् ख्यत्यादित्युत्वं न । सुसखेः । सुसखौ ।
इत्यादि । एवमतिशयितः सखा । अतिसखा । परमः सखा यस्येति विग्रहे । परमसखा ।
परमसखायावित्यादि । गौणत्वेऽप्यनङ् णित्वे प्रवर्त्तेते । सखीमतिक्रान्तोऽतिसखिः ।
लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नटच् । हरिवत् । इहानङ् णित्वे न भव
तः । गोस्त्रियोरिति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात् लक्षणप्रतिपदोक्तयोः
प्रतिपदोक्तस्यैव ग्रहणात् ॥ पतिः समास एव १।४।८ । पतिशब्दः समास एव घि
संज्ञः स्यात् । पत्या । पत्ये । पत्युः २ । पत्यौ । शेषं हरिवत् । समासे तु । भूपतिना ।
भूपतये । कतिशब्दो नित्यं बहुवचनान्तः ॥ बहुगणवतुडति संख्या १।१।२३ । ए
ते संख्यासंज्ञाः स्युः ॥ डति च १।१।२५ । डत्यन्ता संख्या षट्संज्ञा स्यात् ॥ प्रत्ययस्य
लुक्श्लुलुपः १।१।६१ । लुक्श्लुलुप् एतैः शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्सं
ज्ञं स्यात् ॥ षड्भ्यो लुक् ७।१।२२ । षड्भ्यः परयोर्जश्शसोर्लुक् स्यात् ॥ ६ ॥

गेः संबुद्धयत्वाभि इति विशानागो ऐंगयादेशो न भवतीति तेषां माशयः ॥ गु. ४ ं.

प्रत्ययलोपे प्रत्ययलक्षणम् ।१।१।६२ प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात् । इति जसि चेति गुणे प्राप्ते ॥ न लुमताङ्गस्य ॥
१।१।६३ लुक्श्लुलुप एते लुमन्तः । लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् । कति २ । कतिभिः । कतिभ्यः २ । क
तीनाम् । कतिषु । अस्मद्युष्मद्षट्संज्ञकास्त्रिषु सरूपाः ॥ त्रिशब्दो नित्यं बहुवचनान्तः ॥ त्रयः । त्रीन् । त्रिभिः ।
त्रिभ्यः २ ॥ त्रेस्त्रयः ।७।१।५३ त्रिशब्दस्य त्रयादेशः स्यादामि । त्रयाणाम् । परमत्रयाणाम् । गौणत्वे तु नेति केचि
त् । प्रियत्रीणाम् । वस्तुतस्तु प्रियत्रयाणाम् । त्रिषु ॥ द्विशब्दो नित्यं द्विवचनान्तः ॥ त्यदादीनामः ।७।२।१०२
एषामकारोऽन्तादेशः स्याद्विभक्तौ । द्विपर्यन्तानामेवेष्टिः ॥ द्वौ । द्वौ । द्वाभ्याम् ३ । द्वयोः २ । द्विपर्यन्ता
नां किम् । भवान् । भवन्तौ । संज्ञायामुपसर्जनत्वे च नात्वं । सर्वाद्यन्तर्गणकार्यत्वात् । द्विर्नाम कश्चित् । द्विः । द्वौ ।
द्वयः । द्वै द्वावतिक्रान्तोऽतिद्विः । हरिवत् । प्राधान्ये तु परमद्वौ इत्यादि । औडुलोमिः । औडुलोमी । उडुलो
माः । लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः । बाह्वादीञोऽपवादः । औडुलोमिं । औडुलोमी । उडुलोमान् ।
॥ इतीदन्ताः ॥ वातप्रमीः । इत्युणादिसूत्रेण माङ् ईप्रत्ययः कित् । वातं प्रमिमीते वातप्रमीः ॥ दीर्घाज्जसि
च ॥ वातप्रम्यौ । वातप्रम्यः । हे वातप्रमीः ॥ अमिपूर्वः । वातप्रमीम् । वातप्रम्यौ । वातप्रमीन् । वात

त्रयीप्राधान्यबोधकस्य बहुवचनस्याभावात्त्रैण्यित्रयादेशो न्याय्यः =५

गेः संबुद्धयत्वाभि गौणत्वे त्रयादेशो न माशयः ४

हि

मीञ् हिंसायामस्मीनातेरेव क्विबोध्यः यद्वा ईप्रत्ययांतवात
शब्दो वायोर्थ क्विबंतात्तक र्त रि क्विबोध्यः =३

वातप्रम्ये । वातप्रम्यः २ । वातप्रम्योः । वातप्रम्यां । दीर्घत्वान्ननुट् । ङौ तु सवर्णदीर्घः । वातप्रमी । वातप्रमीषु ॥

सि·कौ· २७ एवं ययी पप्यादयः ॥ यातीत्यनेनेति । ययीः । मार्गः । पातीति लोकमिति पपीः । सूर्यः याया किद्ध्वेति ई प्रत्य-

27 यः । क्विबंतं वातप्रमी शब्दस्य तु । अमि शसि ङौ च विशेषः । वातप्रम्यम् । वातप्रम्यः । वातप्रम्यि ॥ एरनेका-
च इति यण्वद्यमालोच्यए । प्रधीवत् । बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी । दीर्घङ्यंतत्वाद्धल्ङ्या^
बिति सुलोपः ॥ यूस्त्र्याख्यौ नदी ॥ १।४।३। ईदूदंतौ नित्य स्त्रीलिंगौ नदीसंज्ञौ स्तः ॥ प्रथमलिंगग्र-
हणं च ॥ पूर्वं स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः ॥ अम्बार्थनद्योर्ह्रस्वः ॥ ७।३।१०७
अम्बार्थानां नद्यंतानां च ह्रस्वः स्यात्संबुद्धौ ॥ हे बहुश्रेयसि । शसि बहुश्रेयसीन् ॥ आण्नद्याः
७।३।११२ नद्यंतात्परेषां ङितामाडागमः स्यात् ॥ आटश्च ६।१।९० । आटोचि परे वृद्धिरेकादेशः ॥६।
स्यात् ॥ बहुश्रेयस्यै । बहुश्रेयस्याः । नद्यंतत्वात्परत्वान्नुट् । बहुश्रेयसीनाम् ॥ ङेराम्नद्याम्नीभ्यः ।
नद्यंतादाबंतान्नीशब्दाच्च परस्य ङेराम् स्यात् ॥ इह परत्वादाटा नुड् बाध्यते ॥ बहुश्रेयस्याम् ॥
मी= शेषं ङ्यूं प्रत्ययान्तवातप्रमीवत् । अङ्यन्तत्वान्न सुलोपः । अतिलक्ष्मीः शेषं बहुश्रेयसीवत् ॥

स्त्रियः पुंव- वः ईयसश्च नाबुवसज यसो बहुश्री बेधात = ।

लक्षेर्मुट् चेत्यौणादिक ईप्रत्ययांतो लक्ष्मी
शब्द इत्युपसर्जनह्रस्वोनेति बोध्यं =१

यद्यपीह क्विबर्थप्रवृत्तिद्वारा तस्योपसर्जनत्वाद्ध्रस्वत्वं प्राप्तं तथापि गोस्त्रियो रित्यत्र कृत्रिमोपसर्जनं गृह्यते
न तु प्रधानस्य क्विपि नात्र ह्रस्वः प्रवर्तते अतएव हरीतकी कलानि हरीतक्य इत्यत्रापि ह्रस्वो न भवति १

कुमारीमिच्छन् कुमारीवाचरन् ब्राह्मणः। कुमारी। क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप्।
हल्ङ्यादिलोपः॥ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६।४।७७। श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधा
तोर्भ्रू इत्येतस्य चांगस्य इयङुवङौ स्तोऽजादौ प्रत्यये परे। ङिच्चेत्यन्तादेशः। आंतरतम्याद् इ
यङ् ओ उवङ्। इति इयङि प्राप्ते॥ एरनेकाचोऽसंयोगपूर्वस्य ६।४।८२ धात्ववयवसंयो
गपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे
इति यण्। कुमार्य्यौ। कुमार्य्यः। हे कुमारि। अमि शसि च कुमार्य्यम्। कुमार्य्यः। कुमार्य्या।
कुमार्य्यै। कुमार्य्याः। कुमारीणाम्। कुमार्य्यां। प्रधीः। प्रध्यम्। प्रध्यः। प्रध्या। उन्नयतीत्यु
न्नीः। धातुनासंयोगस्य विशेषणादिह स्यादेव यण्। उन्न्यौ। उन्न्यः। हे उन्नीः। उन्न्यां। ङे
राम्। उन्न्यां। एवं ग्रामणीः। अनेकाचः किम्। नीः। नियौ। नियः। अमि शसि च परत्वादिय

अग्रग्रामाभ्यां नयतेर्
णो निरुत्तरम् = १

देवाः किम् चक्रतुः चक्रुः
अचीति किम् आप्नुयात्
जुहुयात् = २

इउ इत्यच्चाद्दशानां संज्ञे त्युक्तत्वा
द्यथासंख्यमिह न प्रवर्तते इत्या
ह आंतरतम्यादिति = ३

प्रध्यायतीति प्रधीः ध्यायतेः संप्रसार
णं चेति क्विपि संप्रसारणे पूर्वरूपे च
हल इति दीर्घः यदा तु प्रकृष्टा ध्या
धीर्बुद्धिर्यस्येति विग्रह्यते तदा धी
शब्दस्य नित्यस्त्रीत्वात् प्रथमलिंगग्रह
णे चे नित्यस्त्रीलिंगातिदेशे यथा
सम्भवं नदीकार्य्यं बोध्यम् = ३

तत्सूत्रे द्विवचनात्क्विप् = ३

६९

दुःस्थिता धीर्येषामिति वृश्चिकशब्दस्येति भाष्यकृता हि बुद्धिपरिकल्पितमवयवमाश्रित्य भीशब्दं प्रति गतित्वाभावात् तत्संबन्ध
मात्रविवक्षायां षष्ठीवेति नास्त्यत्र कारकपूर्वत्वमिति भावः =३

नियम्। नियः। ङेराम्। नियाम्॥ असंयोगपूर्वस्य किम्? सुश्रियौ। यवक्रियौ॥ गतिकारके-
तरपूर्वपदस्य यण् नेष्यते॥ शुद्धधियौ। परमधियौ। कथं तर्हि दुर्धियः। वृश्चिकभिय इत्यादि।
उच्यते दुःस्थिता धीर्येषामिति विग्रहे॥ दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति यत्क्रियायुक्ताः
प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः। वृश्चिकशब्दस्य तु बुद्धिकृतमवयवदानत्वं नेह विव-
क्षितं॥ वृश्चिकसंबन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा॥ न भूसुधियोः। ६।४।८५
सुधियौ। सुधियः। सखायमिच्छति। सखीयति। ततः क्विप्
प्। अल्लोपयलोपौ। अल्लोपस्य स्थानिवत्त्वात्। यणि प्राप्ते। क्वौ लुप्तं न स्थानिवत्। एकादेशि
देशविकृतस्यानन्यत्वात् ऽनङ् णित्त्वे प्रवर्तेते। सखा। सखायौ। सखायः। हे सखीः। अ-
भिपूर्वरूपात् परत्वाद्यणि प्राप्ते। ततो विपरत्वात्सख्युरसंबुद्धाविति प्रवर्तते। सखायम्।

नस्थानिवदिति वा च्छित्तं क्वौ विधिं प्रति न स्थानिवदित्यमुपगमात् अन्यथा वेभिदिवाम्हण कुलानीतिहलंते नपुंसके
न ऽनकृते विभिद्यते। क्विप् अल्लोपे यलोपे च क्वौ लुप्तत्वेनाल्लोपस्य स्थानिवत्त्वाभावे उँ ऊलंतं लक्षणनुम्प्रसंगात्तच्छ्रावं =३

सि॰ कौ॰ २८

वृश्चिकसंबन्धिनी भीरितिसंबंध मययोगाभावाद् वृश्चिकस्यानपादानकारकत्वं सूत्रमते ऽपिन दोषइति भावः =२

प्रादिभ्यो धातुजस्येति वार्त्तिकेनोत्तरपदलोपो बोध्यते इत्याशयेनाह =

सुधिः किम् नुद्ध्युपास्यः =४

नपुंसके भावे क्तः क्वौ लोप इत्यर्थः इदं सर्वं कुमारीमिच्छन्तं कुमारीत्यनादिबोध्यम् =३

सवर इति तेन सह इति बहुव्रीहौ तोपसर्जनं न सोति सह इति भावः =२

सखीरित्यादिसुखशब्दात्मनःस्वच्छं कच्चिचेतीत्वम् दीर्घ स्यापीति एतदर्थं ङस्कृतयणानिर्देश इति भावः =२

सखायौ। शम्भिच्छति सख्युः। सह खेन वर्तत इति सखः। तमिच्छतीति सखीः। सुखमिच्छतीति सुखीः।

तत्र सुतमिच्छतीति सुतीः। सख्यौ। सुख्यौ। सुत्यौ। ख्यत्यादिति दीर्घस्यापि ग्रहणम् उकारः। स

ख्युः। सुत्युः। लूनमिच्छतीति लूनीः। क्षाममिच्छतीति क्षामीः। प्रस्तीममिच्छ। प्रस्तीमीः।

एवं ङसिङसोर्गुणः। न त्वमत्वयोः सिद्धत्वात्। ख्यत्यादित्युत्वं। लून्युः। क्षाम्युः। प्रस्ती

म्युः। शुष्कीः। पक्वीः। इयङ् शुष्कियौ। शुष्कियः। ङसिङसोः शुष्कियः। इत्यादि।

तत्साध्य इत्यर्थः =

इति ईदन्ताः। शम्भुर्हरिवत्। एवं विष्णुवायुभान्वादयः॥ तृज्वत् क्रोष्टुः॥ ७।१।

९५। क्रोष्टुशब्दस्तृजन्तेन तुल्यं प्रवर्तते। असंबुद्धौ सर्वनामस्थाने च परे क्रोष्टु

शब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः॥ ऋतो ङि सर्वनामस्थानयोः।

७।३।११०। ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् इति प्राप्ते॥ ऋदुश

अप्रयोगे प्राप्ते सर्वनामस्थाने स्त्रियां च तृजन्त एव तृतीयादौ विभाषा उभयम् अन्यत्र तु तृन्नन्त एवेति नियमार्थं त्रिसूत्री आरभ्यते क्रो

ष्टुरिति तु तृन्तोपस्थमा =४

त्वादिभ्य इति निष्ठा नत्वम् =३

शुष्कः इति निष्ठातस्य कः =४ पचो वः इति वः =

सानुबंधकग्रहणे नातदनुबन्धकस्य ग्रहणम् इति परिभाषाज्ञापनार्थम् =

क्षाममिति क्षायो मः इति मः =३

प्रस्तीममिति प्रस्त्योऽन्यतरस्याम् इति मः स्य संप्रसारणं च संप्रसारणाच्च पूर्वरूपम् एकादेश हल इति दीर्घः =३

कुश आह्वाने रोदने च अस्मात् सित [illegible] सिच्च [illegible] कुशिभ्य [illegible] तुन्प्रत्यये क्रोष्टु शब्दः त्व चितु क्रोष्टृ शब्दः द्वौ अपि [illegible] लक्षणौ तत्राधिक्येण [illegible]

सि·कौ
२९

७०

न्तस्य ऋदंतोनेहसां च ॥ ७।१।९४॥ ऋदंतानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ परे ॥

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥ ६।४।११ अबादी-

नामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे ॥ नप्त्रादिग्रहणं व्युत्पत्तिपक्षे ।

नियमार्थं । तेन पितृभ्रातृप्रभृतीनां न ॥ उद्गातृशब्दस्य भवत्येव ॥ समर्थसूत्र-

त्रे उद्गातार इति भाष्यप्रयोगात् । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारम् ।

७।१।९७

क्रोष्टारौ । क्रोष्टून् ॥ विभाषा तृतीयादिष्वचि ॥ अजादिषु तृतीयादिषु क्रो-

ष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्टे ॥ ऋत उत् ६।१।१११ ऋदंतान्ङसिङसोरति

परे उकार एकादेशः स्यात् ॥ रपरत्वं ॥ रात्सस्य ८।२।२४ रेफात्संयोगान्त-

स्य सस्यैव लोपो नान्यस्य रेफस्य विसर्गः । क्रोष्टुः । आमि परत्वात्तृज्व ।

ङ्गवे प्राप्ते ॥ नैतुमच्चिरत्वज्वद्भावेभ्यो नुट्पूर्वविप्रतिषेधेन ॥ क्रोष्टूनाम् । क्रोष्टरि । क्रोष्टोः । पदेः
हलादेश्च शंभुवत् ॥ इत्युदन्ताः ॥ हूहूः । हूह्वौ । हूह्वः । हूहूम् । हूह्वौ । हूहून् । अतिचमूश
ब्दे तु नदीकार्यं विशेषः । हे अतिचमु । हे अतिचम्वौ । अतिचमूम् । अतिचम्वौ ।
अतिचम्वाः । अतिचमूनाम् । अतिचम्वाम् । खलपूः ॥ ओः सुपि ६।४।८३ धात्ववय
वसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजा
दौ सुपि ॥ गतिकारकेतरपूर्वपदस्य यण् नेष्यते ॥ खलप्वौ । खलप्वः । एवं सुल्वादयः ॥ अनेका
चः किम् ॥ लुवौ । लुवः ॥ धात्ववयवेति किम् ॥ उल्लौ ॥ असंयोगपूर्वस्य किम् ॥ कटप्रूः ।
कटप्रुवौ । कटप्रुवः ॥ गतीत्यादि किम् ॥ परमलुवौ । परमलुवः । सुपि किम् । लुलु
वतुः ॥ स्वयंभूः ॥ न भूसुधियोः ॥ स्वयंभुवौ । स्वयंभुवः ॥ वर्षाभ्वश्च ६।४।८४ ॥

सि॰कौ॰
३०

30

ग्रस्योवर्णस्य यण्स्यादचि सुपि । वर्षाभ्वौ । वर्षाभ्वः । दृंभवतीति दृंभूः ॥ अंदूदृंभूजम्बू
ककलूकर्कंधूदिधिषू इत्युणादिसूत्रेण व्युत्पादितः ॥ दृंभ्वौ । दृंभ्वः । दृंभूम् । दृंभ्वो । दृं
भूत् । दृन्निति नान्ते हिंसार्थेऽव्यये भुवः क्विप् ॥ दृन्भूः ॥ दृन्करपुनःपूर्वस्य भुवो यण्
वक्तव्यः ॥ दृन्भ्वौ । दृन्भ्वः । खलपूवत् ॥ करभ्वम् । करभ्वः । दीर्घपाठे कर एव कारः
। स्वार्थिकः प्रज्ञाद्यण् । कारभ्वौ । कारभ्वः । पुनर्भूर्यौगिकः ॥ पुंसि । पुनर्भ्वावित्या
दि । दृन्भूकाराभूप्रादेः स्वयंभूवत् ॥ इत्यूदन्ताः ॥ धाता । हे धातः । धातरौ । धाता
रः ॥ ऋवर्णान्नस्य णत्वं वाच्यम् ॥ धातॄणाम् । एवं नप्त्रादयः । उद्गाता । उद्गातारौ ।
उद्गातारः । पितॄंव्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वान्न दीर्घः । पितरौ ।
पितरः । पितरम् । पितरौ । शेषं धातृवत् । एवं यामातृभ्रात्रादयः । ना ।

धा॰व॰
३०

नरौ । नरः ॥ नृ च ६।४।६ न इत्यस्य नामि वा दीर्घः ॥ नृणाम् । नृणाम् ॥ इत्यृदन्ताः ॥ कृ त्ऌ अ-
नयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकातिदेशादित्वे रपरत्वम् । कीः ।
किरौ । किरः । तीः । तिरौ । तिरः । इत्यादि गीर्वत् ॥ इत्वाभावपक्षे तु ऋदुशनेति ।
ऋतोऽङीति च तपरकरणादनङ् गुणेन ॥ कृः । क्रौ । क्रः । क्रम् । क्रौ । क्रून् । क्रा ।
क्रे । इत्यादि । इत्यृदन्ताः । गमॢ शकॢ अनयोरनुकरणे । अनङ् गमा शका ।
गुणविषये तु लपरत्वम् । गमलौ । गमलः । गमलम् । गमॄन् । गम्ला । ङसि
ङसोस्तु ऋत उदित्युत्वे लपरत्वे संयोगान्तलोपः । गमुल् । शकुल् । इत्यादि ॥
इति ॡदन्ताः ॥ सेः । सयौ । सयः । स्मृतेः । स्मृतौ तयौ । स्मृतयः ॥ इत्येदन्ताः ॥ गो
तौ णित् ७।१।९० गोशब्दात्परं सर्वनामस्थानं णित्कार्यकृत्स्यात् । गौः । गावौ ।

सि॰कौ॰
३१

(3)

गावः ॥ ओतोम्शसोः ॥ ६।१।९३ आ ओत इतिच्छेदः। ओकारादम्शसोऽचि परे आकार
एकादेशः स्यात् ॥ अम्शसा साहचर्यात्सुपेवाम् गृह्यते अचिनवम्। नेह। गां गावौ गाः
गवे गोः। इत्यादि ॥ ओतोणिदिति वाच्यम् ॥ विहितविशेषणं च। तेन सुद्योः सुद्यावौ
सुद्यावः। ओकारान्ताद्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह ॥ हे भानो भानवः।
उः शंभुः स्मृतोयनसः स्मृतोः स्मृतावौ स्मृतावः स्मृताम्। स्मृतावौ। स्मृताः।
स्मृतवा ॥ इत्योदन्ताः ॥ रायोहलि ७।२।८४ ॥ रै शब्दस्याकारान्तादेशस्याद्धलि वि
भक्तौ अचि आयादेशः। राः। रायौ। रायः। रायं। रायौ। रायः। राया। रायै य
। राभ्याम्। इत्यैदन्ताः। ग्लौः ग्लावौ ग्लावः। ग्लावं। ग्लौवौ। ओतोम्श
सोरिति इह न प्रवर्तते। एओच सूत्रे ए ओ दे तोः सावर्ण्याभावज्ञापनात् ॥ ॥

इत्यजन्ताः ॥ ७ ॥ शुद्धिः ॥ ७ ॥ मम ॥

शिव॰
३१

॥ रमा ॥ औङ आपः ॥ ७।१।१८ । आबन्तादङ्गात्परस्यौङः शी स्यात् । औङित्यौकारविभक्तेः
संज्ञा । रमे । रमाः । सम्बुद्धौ च ७।२।१०६ । आप एकारः स्यात्संबुद्धौ । एङ्ह्रस्वादिति संबुद्धिलोपः ।
हे रमे । हे रमे । हे रमाः । रमां । रमे शीत्वान्नत्वाभावः । रमाः । आङि चापः ७।३।१०५ । आङि
ओसि च परे आबन्तस्याङ्गस्यैकारः स्यात् । रमया । रमाभ्याम् । रमाभिः । याडापः ७।३।११३ ।
आपः परस्य ङिद्वचनस्य याडागमः स्यात् । वृद्धिरेचि । रमायै । सवर्णे दीर्घः । रमायाः । रमा
भ्यां । रमाभ्यः । रमायाः । रमयोः । रमाणाम् । रमायाम् । रमयोः । रमासु । एवं दुर्गाद
यः । सर्वनाम्नः स्याड्ढ्रस्वश्च ७।३।११४ । आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्याद्
स्यात् । आपश्च ह्रस्वः । याटोऽपवादः । सर्वस्यै । सर्वस्याः । एकदेशस्य पूर्वान्तत्वे
न ग्रहणात् आमि सर्वनाम्न इति सुट् । सर्वासां । सर्वस्याम् । शेषं रमावत् । एवं विश्वा

॥ इत्याकारान्ताः ॥

सि॰कौ॰
३२

32

॥ विभाषा दिक्समासे बहुव्रीहौ १।१।२८ ॥ अत्र सर्वनामता वा स्यात् ॥ उत्तरपूर्वस्यै । उत्तरपूर्वायै ॥ दिङ्नामान्यन्तराल इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह । योत्तरासा पूर्वा यस्या उन्मुग्धायाः तस्यै उत्तरपूर्वायै ॥ बहुव्रीहिग्रहणम् स्पष्टार्थम् ॥ अन्तरस्यै शालायै । बाह्यायै इत्यर्थः । अपुरीत्युक्तेर्नेह । अन्तरायै नगर्यै ॥ विभाषा द्वितीयातृतीयाभ्याम् ॥ ७।३।११५ ॥ आभ्यां ङितो वा स्याट् स्यात् । आपश्च ह्रस्वः । इदं सूत्रं त्यक्तुं शक्यं । तीयस्य ङित्सूपसंख्यानात् । द्वितीयस्यै । द्वितीयायै । द्वितीयस्याः । द्वितीयायाः । द्वितीयस्याम् । द्वितीयायाम् । शेषं रमावत् । एवं तृतीया ॥ अम्बार्थनद्योर्ह्रस्वः ॥ हे अम्ब । हे अल्ल । हे अक्क ॥ असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न ॥ हे अम्बाडे । हे अम्बाले । हे अम्बिके । जरा । जरसौ । शीभावात्परत्वाज्जरस् । आमि । नुटः परत्वाज्जर

अत्र अम्बार्थह्रस्वत्वं यदीति वचनात् । डलकेषु असंयुक्तस्य वांबार्थस्य ह्रस्वो भवति नान्येषामित्याशयेन कल्पितमाह ॥ असंयुक्ता इति ॥

प्रतिपदोक्तदिक्समासविधायके दिङ्नामानीति सूत्रे शेषो बहुव्रीहिरित्यतो बहुव्रीहिरित्यधिकारात् ॥ =३

[illegible]

ननु औङ आपः । ह्रस्वनद्याप इत्यादावपि ङित्यनन्तरं जरायाइति सूत्रस्य परत्वादस्त्वेवं परत्वात् ङिच्चापः याडापः ङेराम्नद्याम्नीभ्यः इति विधयो जरसादेशं बाधित्वा परत्वात् स्युरिति चेत् अत्राहुः आड्ङिच्चाप इत्येकारादेशे कृते यो कदेशविकृतन्यायेन जरायाइति जरसादेशप्रसक्त्या नित्यत्वादेकारादेशं बाधित्वा जरसादेश एव भवति न चैकारादेशोऽपि नित्य एव जरसादेशे कृतेऽपि स्यात् निवर्तत्वाना वर्तत्वादादङिच्चाप इति प्रवृत्तेरितिवाच्यं आकाररूपस्यैवापः सर्वत्र ग्रहणादित्यपदमेव वक्ष्यमाणत्वात् तदपरत्वेः याडाप इति याडागमं तु जरसादेशेऽपि तत्रंगत्वाद्बाध्यते न चाकाररूपावंतात्परस्य ङेराम्नीति कृते सन्निपात परिभाषया जरसादेश [illegible] म । रूपमालायां जरसी त्युक्तत्वादिष्टानुरोधेनोक्तपरिभाषाया अनित्य

शि॰ व॰ ३२

जरसामित्यादि इह पूर्वं विप्रतिषेधेन शीभावं सन्निपातपरिभाषाया अनित्यत्वं चाश्रित्य जरसी
ति केचिदाहुः तन्निर्मूलं । यद्यपि जरसादेशस्य स्थानिवद्भावेनावन्ततामाश्रित्य औङः आपः
आङि चापः याडापः ह्रस्वः नद्याः ङेराम् इत्येवं चापि विधयः प्राप्ताः एवं नस् निजरट
स्तु तथाप्यनल्विधावित्युक्तेर्न भवंति । आम्आविति प्रश्लिष्य आकाररूपस्यैवापः स
वर्णग्रहणात् एवं हलड्यादिसूत्रेपि आआ ऋई ई इति प्रश्लेषादिति एवं निक्षोश
म्बिरित्यादि क्षिड्ढे दीर्घग्रहणं प्रत्याख्येयम् । नचैवमप्यतिजरद्वावेत्यत्र स्वाश्रयमाका
रान्तं स्थानिवद्भावेनाप्यताश्रित्य याट् स्यादिति वाच्यम् आवंतत्वं दर्गं ततः परस्य याड्वि
धानात् । उपसर्जनस्त्रीप्रत्यये तदादिनियमात् । पद्दन्न इति नासिकायानस् । नसः । नसा ।
नोभ्यामित्यादि । पद्यते सुपि च दमावत् । निशाम्यानिझ्य । निशा । प्रष्ठ भ्रस्ज सृज मृज यज

सि·कौ·
३३

33

राजृ भ्राजृ ष्टुः शंषः ॥ व्रश्चादीनां सप्तानां छशां तयोः षकारे न्तादेशः स्याज्झलि पदान्ते च ॥
षस्य जश्त्वेन डः । विड्भ्यां । विड्भिः । सुपि डः सीति धुट् पक्षे चर्त्वं तस्यासिद्धत्वाच्चयो
द्वितीया इति ठत्वयो ष्ठ्यौन । न पदान्ताट्टोरिति ष्टुत्वं न ॥ विट्सु । विट्त्सु । षढोः कः
सि । षस्य ढस्य च कः स्यात्सकारे परे । इति तु न भवति । जश्त्वं प्रत्यसिद्धत्वात् । के
चि= चित्तु व्रश्चभ्रस्जादिसूत्रे पदादेधीत्वादिति सूत्रात् धातोरित्यनुवर्तयन्ति । तन्मते तेज
श्त्वेन जकारे निज्भ्याम् । निज्भिः । श्चुत्वं । निक्षु । चोः कुरिति कुत्वं तु न भवति ।
जश्त्वस्यासिद्धत्वात् । मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा ॥ पृतः ।
पृता । पृद्भ्याम् । पक्षे सुटि च रमावत् । गोपा विश्वपावत् । मतिः प्रायेणाह हरिवत् ।
ह्रीत्वान्नेत्वाभावः । मतीः । नात्त्वम् । मत्या । ङिति ह्रस्वश्च ।१।४।६। इयङुवङ्स्था

शिव·
३३

नेयस्त्री शब्द भिन्नौ नित्यस्त्री लिंगावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रीयां वा नदी संज्ञौ स्तो ङिति परे ॥
आण्नद्याः ॥ मत्यै । मतये । मत्याः । मतेः । नदीत्वपक्षे औदितिङेः रोत्वे प्राप्ते ॥ इदुद्भ्याम् ७।३।११७
दू=३ नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात् । पक्षे अच्चघेः । मत्याम् । मतौ । एवं श्रुतिस्मृत्यादयः ।
त्रिचतुरोः स्त्रियां तिसृचतसृ । ७।२।९९ स्त्रीलिंगयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः ।
अचि र ऋतः ७।२।१०० तिसृ चतसृ एतयो ऋकारस्य रेफादेशः स्यादचि ॥ गुणदी-
र्घोत्वानामपवादः । तिस्रः २ । तिसृभिः । तिसृभ्यः २ । आमि नुट्म् चिरेतिनुट् ॥ न
तिसृचतसृ । ६।४।४ एतयोर्नामि दीर्घो न स्यात् । तिसृणाम् । तिसृषु । स्त्रियामिति
त्रिचतुरोर्विशेषणं नेह ॥ प्रिया स्त्रय स्त्रीलिंगा यस्याः सा प्रियत्रिः । इत्यादि । मतिवत् ।
आमि प्रियत्रयाणामिति विशेषः । प्रियाः तिस्रो यस्य स इति विग्रहे तु । प्रियतिसा ।
प्रियतिसृौ । प्रियतिस्रः । प्रियतिस्रमित्यादि । प्रियाः तिस्रो यस्य तत्कुलं प्रियत्रि ॥

सि. कौ. ३४

84

स्वमोर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः ॥ न लुमतेति निषेधस्यानित्यत्वात्पक्षे प्रि
य तिसृ रादेशात्पूर्वं विप्रतिषेधेन नुम् । प्रियतिसृणी । प्रियतिसॄणि । तृतीयादिषु वक्ष्य^
प्रियतिस्रे । प्रियतिसृणे । प्रियतिसृणः । आमि रादेशं बाधित्वा पूर्वविप्रतिषेधेन नुम् तं च बाधित्वा पूर्वविप्रतिषेधेन नुट् । प्रियतिसृणाम् ॥ =२
माणपुंवद्भावविकल्पात्पक्षे नुमभावौ । प्रियतिस्रा । प्रियतिसृणा । इत्यादि । द्वेरत्वे सत्या
प् ॥ द्वे २ । द्वाभ्याम् ३ । गौरी । गौर्यौ । गौर्यः । नदीकार्यं । हे गौरि । गौर्यै इत्यादि । एवं वाणीनद्या
दयः ॥ प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणादनङ्णिद्भावे प्राप्ते । विभक्तौ लिंग
विशिष्टाग्रहणम् ॥ सखी । सख्यौ । सख्यः । इत्यादि । अङ्यन्तत्वान्न सुलोपः । लक्ष्मीः ।
शेषं गौरीवत् । एवं तरीतन्त्र्यादयः । स्त्री । हे स्त्रि ॥ स्त्रियाः ६।४।७९ स्त्रीशब्दस्येयङ्
स्यादजादौ प्रत्यये परे ॥ स्त्रियौ । स्त्रियः । वामशसोः ६।४।८० । अमि शसि च स्त्रिया इयङ् वा
स्यात् । स्त्रियम् । स्त्रीम् । स्त्रियौ । स्त्रियः । स्त्रीः । स्त्रिया । स्त्रियै । स्त्रियाः २ । स्त्रियोः । परत्वान्नु
ट् । स्त्रीणाम् । स्त्रियाम् । स्त्रियोः । स्त्रीषु ॥ स्त्रियमतिक्रान्तः । अतिस्त्रिः । अतिस्त्रियौ ।

शिव. ३४

गुणनाभावो त्वनुङ्ङि: ङ्डि: परत्वात्तं हि बाध्यते । क्लीबे नुमा च स्त्रीशब्दस्येयङ् इत्यवधारितम् ॥ जसि च ।
अतिस्त्रयः । हे अतिस्त्रे । वाम्शसोः । अतिस्त्रियम् । अतिस्त्रिम् । अतिस्त्रियौ । अतिस्त्रियः । अतिस्त्रीन् ।
अतिस्त्रिणा । घेर्ङिति । अतिस्त्रये । अतिस्त्रेः २ । अतिस्त्रियोः । अतिस्त्रीणाम् । अच्च घेः । अति
स्त्रौ ॥ औरस्यौकारे च नित्यं स्यादम्शसो विभाषया । इयादेशे विनान्यत्र स्त्रियाः पुंस्युपसर्जने ।
क्लीबे तु नुम् । अतिस्त्रि । अतिस्त्रिणी । अतिस्त्रीणि । अतिस्त्रिणे । ङेप्रभृतावजादौ वक्ष्यमाण
पुंवद्भावात्पक्षे प्राग्वद्रूपम् । अतिस्त्रये । अतिस्त्रिणः । अतिस्त्रेः २ । अतिस्त्रिणोः । अतिस्त्रि
योः इत्यादि । स्त्रियां तु प्रायेण पुंवत् । श्रीः । अतिस्त्रीः । अतिस्त्रिया । ङिति ह्रस्वश्चेति ह्रस्वा
न्तत्व प्रयुक्तो विकल्पः । अतिस्त्री इति तु इयङुवङ्स्थानावित्यस्यैव पर्युदासं न तु ह्रस्वस्यैवानुवृत्तेः
तस्मात्तदीर्घस्यैवायं निषेधो न तु ह्रस्वस्य । अतिस्त्रियै । अतिस्त्रये । अतिस्त्रियाः । अतिस्त्रेः २ ।

सि·कौ·
३५

35

अति स्त्रियाम्। अतिस्त्रौ। श्रीः। श्रियौ। श्रियः। नेयङुवङ्स्थानावस्त्री १।४।४॥ इयङुवङोः स्थितिर्य
योः तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री। हे श्रीः। श्रियै। श्रिये। श्रियाः। श्रियः २॥ वामि १।४।५
इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणाम्। श्रियाम्। श्रियाम्
श्रियि। प्रधीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद्रूपम्। प्रकृष्टा धीरिति विग्रहे तु ल
क्ष्मीवत्। अभिधानिकं च प्रध्यम्। प्रध्य इति विशेषः। सुष्ठु धीर्यस्याः सुष्ठु ध्यायतीति वे
ति विग्रहे वृत्तिकारमते सुधीः श्रीवत्। मतान्तरे पुम्वत्। सुष्ठु धीरिति विग्रहे तु श्री
वदेव। ग्रामणीः पुम्वत्। ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विनापि स्त्रियाम प = ३
प्रवृत्तेः। एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकम्बोध्यम्। धेनुर्मतिवत्। स्त्रियां च ७।१
।९६ स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते॥ ऋन्नेभ्यो ङीप् ४।१।५ ऋदन्तेभ्यो

श्रीव·
३५

नान्तेभ्यश्च स्त्रियाम् ङी स्यात्। क्रोष्ट्री। क्रोष्ट्र्यौ। क्रोष्ट्र्यः। वधूर्गौरीवत्। सुभ्रूः। श्रीवत्। हे सु
भ्रूः। कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः। प्रमाद एवायमिति बहवः। खलपूः पुंवत्
। पुनर्भूः। दृन्करेति यण्। उवङो बाधनान्नेयङुवङिति निषेधो न। हे पुनर्भु। पुनर्भ्वौ। पु
नर्भ्वः। पुनर्भ्वम्। पुनर्भ्वौ॥ एकाजुत्तरपदे णः ८।४।१२ एकाजुत्तरपदं यस्य तस्मिन्समासे
पूर्वपदस्था[illegible]न्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। आरं
भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्ग्रहणं स्पष्टार्थम्। यणं बाधित्वान्नुट् परत्वान्नुट्। पुनर्भू
णाम्। वर्षाभूः। भेक जातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः। कैयटमते। मतान्तरे तु हे वर्षाभु।
पुनर्नवायां तु। हे वर्षाभु। भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमानिति यादवः॥ वर्षाभ्वश्च॥
वर्षाभ्वौ। वर्षाभ्वः। स्वयंभूः पुंवत्। न षट्स्वस्रादिभ्यः ४।१।१० षट्संज्ञकेभ्यः स्वस्रादि
भ्यश्च ङीप्टापौ न स्तः। स्वसा तिस्रश्च चतस्रश्च ननान्दा दुहिता तथा। याता मातेति

सि॰ कौ॰ ३६

38

ति स्रश्चेते स्वस्रादय उदाहृताः ॥ ऋदन्त इति दीर्घः ॥ स्वसा । स्वसारौ । स्वसारः । माता पितृवत् । शसि
मातॄः । द्यौर्गोवत् । राः पुम्वत् । नौर्ग्लौवत् ॥ इत्यजन्ताः स्त्रीलिङ्गाः ॥ ६ ॥ शुभम् ॥
अतोम् ७।१।२४ अतोऽङ्गात्क्लीबात्स्वमोरम् स्यात् । अमिपूर्वः । ज्ञानम् । एङ्ह्रस्वादिति हल्मात्रलो नभ्रिर्जीनम् = ३
पः । हे ज्ञान । नपुंसकाच्च ७।१।१९ क्लीबात्परस्यौङः शी स्यात् । भसंज्ञायाम् । यस्येति च ६।४।१४८
भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे । इत्यकारलोपे प्राप्ते । औङः श्यां प्रतिषेधो वा
च्यः ॥ ज्ञाने । जश्शसोः शिः ७।१।२० क्लीबादनयोः शिः स्यात् । शि सर्वनामस्थानम् १।१।४४
शि इत्येतदुक्तसंज्ञं स्यात् । नपुंसकस्य झलचः ७।१।७२ झलन्तस्याजन्तस्य च क्लीबस्य नुमाग
मः स्यात् सर्वनामस्थाने परे । उपधादीर्घः । ज्ञानानि । पुनस्तद्वत् । ज्ञानम् । ज्ञाने । ज्ञानानि ।
शेषं रामवत् । ज्ञानेन । एवं धनवनफलादयः । अद्ड्डतरादिभ्यः पञ्चभ्यः ७।१।२५ एभ्यः
क्लीबेभ्यः स्वमोरद्डादेशः स्यात् । टेः ६।४।१४३ डिति परे भस्य टेर्लोपः स्यात् ॥ वावसाने ॥

शिव॰ ३६

कतरत् । कतरद् । कतरे । कतराणि । अस्येति किम् पञ्चमः । टेर्लुप्ते तत्वात्त्यमयोरिति पूर्वसूत्रेण व
र्णदीर्घेन । एङ्ह्रस्वादिति संबुद्धिलोपश्च न भवति । हे कतरत् । पुनः स्तद्वत् । कतरत् । कतरद्
कतरे । कतराणि । शेषं पुम्वत् । कतमत् । इतरत् । अन्यतरत् । अन्यतमस्य तु अन्यतमम् इ
त्येव । एकतरात्प्रतिषेधो वक्तव्यः । एकतरम् । सोरमादेशे कृते सन्निपातपरिभाषया न जरस् ।
अजरम् । अजरे । परत्वाज्जरसादेशे कृते । फलं तन्नत्वान्नुम् । सान्तमहतः संयोगस्य ६।४।१०
सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे । अज
रांसि । अजराणि । अमि लुकोऽपवादममं भावं बाधित्वा परत्वाज्जरस् । ततः सन्निपातपरि
भाषया न लुक् । अजरसम् । अजरम् । अजरसी । अजरे । अजरांसि । अजराणि शेषं पु
म्वत् । पदन्न् इति हृदयोदकास्यानां । हृदय उदक आसन् । हृदि । हृदा । हृद्भ्याम् । इत्यादि ।
उदानि । उद्ना । उदभ्यामित्यादि । आसानि । आस्ना । आस्भ्यामित्यादि । मांसि ।८।

सि.कौ.
३७
37

मांसः। मान्स्यामित्यादि। वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तम्॥ अत माष्ये मांस्पच
चन्या। उखाया इत्युदाहृतम्। अयस्मयादित्वेन भत्वात्संयोगान्तलोपेन। यद्यपि पदन्ता
इत्यत्र छंदसीत्यनुवर्तितं तथापि। तथा व्ययोमीत्यत्र मासः छन्दसीति वार्तिके छन्दोग्रहण
सामर्थ्याल्लोकेपि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति को
ध्यम्। ह्रस्वो नपुंसके प्रातिपदिकस्य १।२।४७ क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्या
त्॥ श्रीपं ज्ञानवत्। श्रीपाय। अत्र सन्निपातपरिभाषया आतो धातोरित्यालोपो
न। स्वमोर्नपुंसकात् ७।१।२३ क्लीबादंगात्स्वमोर्लुक् स्यात्। वारि। इकोचि विभक्तौ ७।१।७३
इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ। वारिणी। वारीणि। न लुमतेति निषेधस्या
नित्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः। हे वारे। हे वारि। आङो ना। वारिणा।
घेर्ङितीति गुणे प्राप्ते॥ वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन॥ वारिणे।

शिव.
३७

वारिणः । वारिणोः । नुमचिरेति नुट् नामीति दीर्घत्वम् । वारीणाम् । वारिणोः । हलादौ हरिवत् । तृतीया
दिषु भाषितपुंस्कं पुंवद्गालवस्य ।७।१।७४। प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा
स्याट्टादावचि । अनादये । अनादिने । इत्यादि । शेषं वारिवत् । पीलुर्वृक्षः । तत्फलं पीलु तस्मै पी
लुने । अत्र न पुंवत् । प्रवृत्तिनिमित्तभेदात् ॥ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ।७।१।७५।
एषामनङ् स्याट्टादावचि स चोदात्तः । अल्लोपोऽनः ॥ दध्ना । दध्ने । दध्नः । दध्नोः । दध्नाम् । दध्नि ।
दधनि । शेषं वारिवत् ॥ एवमस्थिसक्थ्यक्षि । तदन्तस्याप्यनङ् । अतिदध्ना । सुधि । सु
धिनी । सुधीनि । हे सुधे । हे सुधि । सुधिया । सुधिना । प्रध्या । प्रधिना । मधु । मधुनी ।
मधूनि । हे मधो । एवमम्बादयः । सानुशब्दस्य स्नुर्वा । स्नूनि । सानूनि । प्रियक्रोष्टु । प्रि
यक्रोष्टुनी । तृज्वद्भावात्पूर्वं विप्रतिषेधेन नुम् । प्रियक्रोष्टूनि । टादौ पुंवत्त्वपक्षे प्रियक्रो
ष्ट्रा । प्रियक्रोष्ट्रे । प्रियक्रोष्टवे । अन्यत्र तृज्वद्भावात्पूर्वं विप्रतिषेधेन नुमेव । प्रियक्रो

भाषितपुमान्यत्प्रवृत्ति
निमित्ते तदभाषितपुंस्कम्
प्रवृत्तिनिमित्तम् तदाश्रय
प्रवृत्तिनिमित्तम् शब्द
स्वरूपे तदभाषितपुंस्क
शब्दस्वरूपम् ॥=

= सि ८७

सि·कौ·
३८
38

प्रियक्रोष्टुने। नुमचिरेति नुट्। प्रियक्रोष्टूनाम्। सुलु। सुलुनी। सुल्वा। सुलुना। धातृ।
धातृणी। धातॄणि। हे धातः। हे धातृ। धात्रा। धातृणा। एवं ज्ञातृकर्त्रादयः। ए
च इग्घ्रस्वादेशे १।१।४८ आदिश्य मानेषु ह्रस्वेषु एच इगेव स्यात्। प्रद्यु। प्रद्युनी
प्रद्यूनि। इत्यादि। इह नुम्वत्। यदि गतं प्रद्यु इति तस्याभाषितपुंस्कत्वाभावात्।
एव मेत्रेधि। प्ररि। प्ररिणी। प्ररीणि। प्ररिणा। एकदेशविकृतस्यानन्यत्वात्।
रायो हलीत्यात्वम्। प्रराभ्याम्। प्रराभिः। नुमचिरेति नुट्यात्वम्। प्रराणामि
ति माधवः॥ वस्तुतस्तु सन्निपातपरिभाषया नुट्यात्वं न। नामीति दीर्घस्यारंभ
सामर्थ्यात् परिभाषां बाधते इत्युक्तम्। प्ररीणाम्। सुनु। सुनुनी। सुमनूनि।
इत्यादि॥ इत्यजन्ता नपुंसकलिङ्गाः॥ समाप्तम्। शुभम्। दाद्विणेनमः॥
श्रीशारदायैनमः॥ शुभम्॥ श्रीः॥ शुभम्॥ श्रीः। शुभम्॥

शि·क·
३८

हो ढः ८।२।३१ हस्य ढः स्याज्झलि पदान्ते च ॥ हलङ्याब्भ्य इति सुलोपः। पदान्तत्वाद्धस्य ढः। जश्त्व चर्
त्वे। लिट्। लिड्। लिहौ। लिहः। लिड्भ्यामित्यादि। लिट्सु। लिट्त्सु॥ दादेर्धातोर्घः ८।२।३२ उप
देशे दादेर्धातोर्हस्य घः स्यात् झलि पदान्ते च। उपदेशे किम्। अधोक् इत्यत्र यथा स्यात्। दाम
लिहमात्मन इच्छति दामलिह्यति। ततः क्विप्। दामलिट् अत्र मा भूत्। एकाचो बशो भष् झष
न्तस्य स्ध्वोः ॥ धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे
परे पदान्ते च। एकाचो धातोरिति सामानाधिकरण्येनान्वये तु इह न स्यात्॥ गर्द्दभमाचष्टे गर्द्द
भयति॥ ततः। क्विप् णिलोपः गर्धप्। झलीति निवृत्तम्। स्ध्वोर्ग्रहणसामर्थ्यात्। तेने
ह न। दुग्धम्। दोग्धा। व्यपदेशिवद्भावेन धात्ववयवत्वाद्भष्भावः। घे जश्त्व चर्त्वे। धुक्।
धुग्। दुहौ। दुहः। घत्व चर्त्वे। धुक्षु॥ वा द्रुहमुहष्णुहष्णिहाम् ८।२।३३। एषां हस्य वा
घः स्याज्झलि पदान्ते च। ध्रुक्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्याम्॥ ॥

धुड्भ्याम्। धुत्सु। धुट्सु। धुट्त्सु। एवं मुहस्नुहष्णिहाम्। इग्यणः संप्रसारणम् १।१।४५
यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात्॥ वाह ऊठ् ६।४।१३२ भस्य वाहः सं
प्रसारणम् ऊठ् स्यात्। संप्रसारणाच्च ६।१।१०८ संप्रसारणादचि पूर्वरूपमेकादेशः स्यात्।
एत्येधत्यूठ्सु॥ विश्वौहः। विश्वौहा। इत्यादि। छन्दस्येव ण्विरिति पक्षे णिजन्तादि
च्। चतुरनडुहोरामुदात्तः ७।१।९८॥ अनयोराम् स्यात् सर्वनामस्थाने परे स चोदात्तः।
सावनडुहः ७।१।८२ अस्य नुम् स्यात् सौ परे॥ आदित्यधिकारादवर्णात्परोयं नुम्। अ
तो विशेषविहितेनाप्यनुमाम्न बाध्यते। आमा च नुम्न बाध्यते। सोर्लोपः। नुम्विधि
सामर्थ्याद्वसुस्रंस्विति दत्वं न। संयोगान्तलोपस्यासिद्धत्वान्नलोपो न। अनड्वान्।
अम् संबुद्धौ ७।१।९९ चतुरनडुहोरम् स्यात् संबुद्धौ॥ अमोऽपवादः। हे अनड्वन्।
अनड्वाहौ। अनड्वाहः। अनड्वाहम्। अनड्वाहौ। अनडुहः। अनडुहा। वसुस्रंसुध्वं

सि॰कौ॰ ३९

शिव॰ ३९

सु नडुहान्दः ८।२।७२ सान्तवस्वन्तस्रंसादेश्च दः स्यात्पदान्ते। अनडुद्भ्याम् इत्यादि। सान्तेति किम्।
विद्वान्। विद्वांसौ। पदान्तेति किम्। स्रस्तं। ध्वस्तं। सहेः साडः सः ८।३।५६ साड्रूपस्य सहेः स
स्य मूर्द्धन्यादेशः स्यात्। तुराषाट्। तुराषाड्। तुरासाहौ। तुरासाहः। तुराषाड्भ्यामित्यादि। तुरं सहते
छु=४ इत्यर्थे छन्दसि। सह इति शिवः। लोके तु साहयतेः क्विप्। अन्येषामपीति पूर्वपदस्य दीर्घः। दि
व औत् ७।१।८४ दिविति प्रातिपदिकस्यौत्स्यात्सौ परे। अल्विधित्वेन। स्थानिवत्त्वाभावाद्धल्ङ्या
बिति सुलोपो न। सुद्यौः। सुदिवौ। सुदिवः। सुदिवम्। सुदिवौ। दिव उत् ६।१।१३१ दिवान्तादेश उ
कारः स्यात्पदान्ते। सुद्युभ्यामित्यादि। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः२। षट्चतुर्भ्यश्च
७।१।५५ षट्संज्ञकेभ्यश्चतुर्भ्यश्च परस्यामो नुडागमः। णत्वं। द्वित्वम्। चतुर्णाम्। रोः सु
पि ८।३।१६ सप्तमीबहुवचने परे रोरेव विसर्जनीयो नान्यरेफस्य। षत्वम्। षस्य द्वित्वे प्रा
प्ते। शरोऽचि ८।४।४९ अचि परे शरो न द्वे स्तः। चतुर्षु। प्रियचत्वाः। हे प्रियचत्वः॥

प्रियचत्वारो । प्रियचत्वारः । गौणत्वे तु नुम् एव नेष्यते । प्रियचतुराम् । प्राधान्ये तु स्यादेव । पर
सि·कौ· ४० मचतुर्णाम् । कमलं कमलां वाचष्टाणः । कमल् । कमलौ । कमलः । षत्वम् । कमल्षु ।
मो नो धातोः ८।२।६४ । धातोर्मस्य नः स्यात्पदान्ते । नत्वस्यासिद्धत्वान्नलोपो न । प्रशा
40 म्यतीति । प्रशान् । प्रशामौ । प्रशामः । प्रशान्भ्यामित्यादि ॥ किमः कः ७।२।१०३ । किमः
कः स्याद्विभक्तौ अकच्सहितस्याप्ययमादेशः । कः । कौ । के । इत्यादि । सर्ववत् । इ
दमो मः ७।२।१०८ इदमः सौ मो मः स्यात्सौ परे । त्यदाद्यत्वापवादः । इदोऽय् पुंसि ७।२।१११
इदम इदः स्थाने अयः स्यात्सौ पुंसि । सुलोपः । अयम् । त्यदाद्यत्वं पररूपत्वञ्च ।
दश्च ७।२।१०९ इदमो दस्य मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेः संबोधनं नास्तीत्युत्स
स्ये = र्गः ॥ अनाप्यकः ७।२।११२ अककारस्येदम इदोऽन् स्यादापि विभक्तौ परे । आबिति टा
इत्यारभ्य सुपः पकारेण प्रत्याहारः ॥ अनेन ॥ हलि लोपः ७।२।११३ अककार प्रा·वृ· ४०

स्य दमइदो लोपः स्यादापि हलादौ परतः ॥ नानर्थके लोन्त्य विधिरनभ्यास विकारे ॥ आद्य न्तवदेकस्मिन् १।१।२१ एकस्मिन् क्रियमाणं कार्य्यमादाविवान्त इव स्यात् । आभ्याम् । नेदम दसोरकोः ७।१।११ अककारयोरेतयोर्भिस ऐस्न स्यात् । एतम् । अत्वम् । नित्यत्वान्ङे स्मै । यस्माद्धलिलोपः ॥ अस्मै । अभ्याम् । एभ्यः । अस्मात् । आभ्याम् । एभ्यः । अस्य । अनयोः । एषाम् । अस्मिन् । अनयोः । एषु । ककारयोगे तु । अयकम् । इमकौ । इम के । इमकम् । इमकौ । इमकान् । इमकेन । इमकाभ्याम् । इमकैः । इत्यादि ॥ इदमो न्वादेशेऽशनुदात्तस्तृतीयादौ २।४।३२ अन्वादेशविषयस्येदसोमोऽनुदात्तोऽशादे शः स्यात्तृतीयादौ अशवचनं साकच्कार्थम् ॥ द्वितीयाटौस्स्वेनः २।४।३४ । द्विती

दा= याटौस्सोस्वपरत इदमे तदोरेनदेशः स्यादन्वादेशे ॥ किञ्चित्कार्य्यं विधातु मु पात्तस्य कार्य्यांन्तरं विधातुं पुनरुपादानमन्वादेशः । यथानेन व्याकरणमधीत

अनुनासिकस्य क्विझलोः क्ङिति दीर्घः ॥ ३

छन्दोध्यावय। अनयोः पवित्रं कुलं एनयोः प्रभूतं स्वमिति। एनम्। एनौ। एनान्। एनेन। एन
सि॰कौ॰ ४१ योः २। गमः क्वौ यतेर्क्विच। सुगण्। सुगणौ। सुगणः। सुगण्सु। सुगण्ट्सु। क्विप् पक्षे। सु
गाण्। सुगाणौ। सुगाणः। सुगाण्सु। सुगाण्ट्सु। वरत्वादुपधाया दीर्घः॥ हल्ङ्याब्भ्यो दीर्घात्
सुलोपः। राजा। न ङिसंबुद्ध्योः ८।२।८ नस्य लोपो नस्यान् ङौ संबुद्धौ च। हे राजन्। ङौ
तु छन्दस्युदाहरणम्॥ सुपां सुलुगिति ङेर्लुक्। निषेध सामर्थ्यात् प्रत्यय लक्षणम्।
परमे। व्योमन्। ङावुत्तर पदे प्रतिषेधो वक्तव्यः। चर्मणि तिला अस्य चर्मतिलः। ब्र
ह्मणि निष्ठाऽस्य ब्रह्मनिष्ठः। राजानौ। राजानः। राजानम्। राजानौ॥ अल्लोपोऽनः॥ श्रुत
म्॥ न चाल्लोपः। स्थानिवत् पूर्वत्रासिद्धे ॥ सिद्धे तन्निषेधात्। नापि बहिरंगतयाऽसिद्धः। यथो
द्देशपक्षे षाष्ठीय परिभाषां प्रति श्रुतस्यासिद्धतया अन्तरंगाभावे परिभाषाया अप्रव
त्तेः। राज्ञा राज्ञः। राज्ञः। राज्ञा। नलोपः सुप्स्वर संज्ञा तुग्विधि कृति। सुब्विधौ धा॰व॰ ४१

स्वर्विधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र । राजाश्व इत्यादौ इत्यस्यासिद्ध-
त्वा दात्वमेत्वमैत्वं न स्यात् । राजभ्याम् । राजभिः । राज्ञे । राजभ्याम् । राजभ्यः । विभाषा ङि-
श्योः । राज्ञि । राजनि । राजसु । प्रतिदीव्यतीति प्रतिदिवा । प्रतिदिवानौ । प्रतिदिवानः । अ-
स्य भ विषये अल्लोपे कृते । हलि च ८।२।७७ रेफवकारान्तस्य धातोरुपधाया इको दी-
र्घः स्याद्धलि । न चाल्लोपः स्थानिवत् । दीर्घविधौ तन्निषेधात् । बहिरंगपरिभाषात्क्रन्या
येन न प्रवर्तते । प्रतिदीव्नः । प्रतिदीव्नेत्यादि । यज्वा । यज्वानौ । यज्वानः ॥ न संयोगाद्व-
न्तात् ॥ के रु वकारमकारान्तसंयोगात्परस्यान्नोकारस्य लोपो न स्यात् । यज्वनः । य-
ज्वना । यज्वभ्यामित्यादि । ब्रह्मणः । ब्रह्मणेत्यादि । इन्हन्पूषार्यम्णां शौ ६।४।१२
एवं शावेव उपधाया दीर्घो नान्यत्र इति निषेधे प्राप्ते । सौ च ६।४।१३ इन्नादीनामुप-
धाया दीर्घः स्यादसंबुद्धौ सौ परे । हे वृत्रहन् । एकाजुत्तरेति णत्वं ॥ वृत्रहणौ । वृत्रहणः ।

सि. कौ. ५२

५२

वृत्रहणम् । वृत्रहणौ ॥ हो हन्तेर्ञ्णिन्नेषु ७।३।५४ ञिति णिति प्रत्यये परे नकारे च हन्तेर्हस्य
कुत्वं स्यात् ॥ हन्तेः ८।४।२२ उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात् । प्रह
ण्यात् । अत्पूर्वस्य । हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यस्य । प्रघ्नन्ति । योगविभाग
सामर्थ्यादनन्तरस्य विधिर्वा प्रतिषेधो वेति न्यायं बाधित्वा एकाजुत्तरे इति णत्व
मपि निवार्यते । नकारे परे । कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत् । वृत्रघ्नः । वृ
त्रघ्नेत्यादि यत्तु वृत्रघ्न इत्यादि । वैकल्पिकं णत्वं माधवेनोक्तं तद् भाष्यवार्तिकविरु
द्धं ॥ एवं शार्ङ्गिन् । यशस्विन्नर्यमन् पूषन् । प्रभृतयः । यशस्विन्निति विन् प्रत्यये इनो
नर्थकत्वेपि इन्हन्नित्यग्रहणं भवत्येव । अनिनस्मन्ग्रहणान्यर्थव

भाष्ये तु कुत्ववाये हादेशाधु प्रत्तेषे धोवक्त[illegible] =६ व्यः